CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

- Title – श्री भागवतमहापुराणे प्रथमस्कन्धे एकोनविंशो- अध्याय:
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ४५ पेज/पृष्ठ 89
- Lines-
- Size
- Substance Paper – ×
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period – ×
- Beginning – गूढो मूढ इवेयंते ४ दृष्ट्वानुयांतमृषिमात्मज –
- End – इति श्री भागवते महापुराणे प्रथम स्कन्धे शुका- गमने नाम एकोनविंशोऽध्याय: ॥ १९ ॥
- Colophon-
- Illustrations -
- Source -
- Subject - भागवत पुराण
- Revisor -
- Author - वेद व्यास
- Remarks- अपूर्ण

मोहन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गूढो मूढ इवेयंते ४ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रियापरिदधुर्न
सुतस्य चित्रं तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विवि
क्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विच उ२
रन्गजसाह्वये ६ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्त
त्र यत्रैषा सात्वती श्रुतिः ७ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते
महाभागस्तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं तस्य
जन्म महाश्चर्यं कर्म्माणि च गृणीहि नः ९ स सम्राट् कस्य वा हेतोः पांडूनां मान
वर्द्धनः प्रायः प्रविष्टो गंगायामनादृत्याऽधिराट् श्रियम् १० नमंति यत्पाद
निकेतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्य
जां युवैषतोत्स्रष्टुमहो सहासुभिः ११ शिवाय लोकस्य भवाय भूतये य उत्त

मश्लोकथंपरायणाजनाः जीवंतिनात्मार्थमसौपराश्रयंमुमोचनिर्विद्यकु
तःकलेवरं १२ तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन मन्येत्वांविषयेवा
चांस्नातमन्यत्रछांदसात् १३ श्रीसूतउवाच द्वापरेसमनुप्राप्तेतृतीयेयुग
पर्यये जातःपराशरात्योगीवासव्यांकलयाहरेः १४ सकदाचित्सरस्वत्या
मुपस्पृश्यजलंशुचिः विविक्तएकआसीनउदितेरविमंडले १५ परावरज्ञः
सऋषिःकालेनाव्यक्तरंहसा युगधर्मव्यतिकरंप्राप्तंभुवियुगेयुगे १६ भौ
तिकानांचभावानांशक्तिह्रासंचतत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधानु
ह्रसितायुषः १७ दुर्भगांश्चजनान्वीक्ष्यमुनिर्दिव्येनचक्षुषा सर्ववर्णाश्र
माणांयद्दध्यौहितममोघदृक् १८ चातुर्होत्रंकर्मशुद्धंप्रजानांवीक्ष्यवैदिकं
विदधाद्यज्ञसंतत्यैवेदमेकंचतुर्विधम् १९ ऋग्यजुःसामाथर्वाख्यावेदाश्च

त्वारउद्धृताः इतिहासपुराणंचपंचमोवेदउच्यते २० तत्रऋग्वेदधरःपै
लःसामगोजैमिनिःकविः वैशंपायनएवैकोनिस्नातोयजुषामुत २१
अथर्वांगिरसामासीत्सुमंतुर्दारुणोमुनिः इतिहासपुराणानांपितामेरो
महर्षणः २२ तएवऋषयोवेदंस्वंस्वंव्यसन्ननेकधा शिष्यैःप्रशिष्यैस्त
च्छिष्यैर्वेदास्तेशाखिनोभवन् २३ तएववेदादुर्मेधैर्धार्यंतेपुरुषैर्यथा
एवंचकारभगवान्व्यासःकृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनांत्र
यीनश्रुतिगोचरा कर्म्मश्रेयसिमूढानांश्रेयएवंभवेदिह २५ इतिभा
रतमाख्यानंकृपयामुनिनाकृतं एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः
२६ सर्वात्मकेनापियदानतुष्यत्हृदयंततः नातिप्रसन्नहृदयःसर
स्वत्यास्तटेशुचौ २७ वितर्कयन्विविक्तस्थइदंप्रोवाचधर्म्मवित् धृत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
६

व्रतेनहिमयाछंदांसिगुरवोग्नयः २८ मानितानिर्व्यलीकेनगृहीतंचानु
शासनं भारतव्यपदेशेनह्याम्नायार्थश्चप्रदर्शितः दृश्यतेयत्रधर्मादिःस्त्री
शूद्रादिभिरप्युत २९ तथापिवतमेदैह्योह्यात्माचैवात्मनाविभुः असंप
न्नइवाभातिब्रह्मवर्चस्यसत्तमः ३० किंवाभागवताधर्मानप्रायेणनिरूपि
ताः प्रियाःपरमहंसानांतएवह्यच्युतप्रियाः ३१ तस्यैवंखिलमात्मानंम
न्यमानस्यखिद्यतः कृष्णस्यनारदोऽभ्यागादाश्रमंप्रागुदाहृतं ३२ तमभि
ज्ञायसहसाप्रत्युत्थायागतंमुनिः पूजयामासविधिवन्नारदंसुरपूजितं
३३ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेनारदव्याससंवादोनामचतुर्थो
ध्यायः ॥४॥ श्रीसूतउवाच ॥ ॥ अथतंसुखमासीनं बृहच्छ्रवाः देवर्षिः उपासीनं २
प्राहविप्रर्षिवीणापाणिःस्मयन्निव १ श्रीनारदउवाच ॥ ॥ पाराशर्यमहाभा
कृष्ण
६

गभवतःकच्चिदात्मना परितुष्यतिशारीरआत्मामानसएववा २ जिज्ञा
सितंसुसंपन्नमपितेमहदद्भुतम् कृतवान्भारतंयस्त्वंसर्वार्थपरिवृंहितं
३ जिज्ञासितमधीतंचब्रह्मयत्तत्सनातनं तथापिशोचस्यात्मानमकृतार्थ
इवप्रभो ४ श्रीव्यासउवाच अस्त्येवमेसर्वमिदंत्वयोक्तंतथापिना
त्मापरितुष्यतेमे तन्मूलमव्यक्तमगाधबोधंपृच्छामहेत्वात्मभवात्मभूत
५ सवैभवान्वेदसमस्तगुह्यमुपासितोयत्पुरुषःपुराणः परावरेशोम
नसैवविश्वंसृजत्यवत्यत्तिगुणैरसंगः ६ त्वंपर्यटन्नर्कइवत्रिलोकी
मंतश्चरोवायुरिवात्मसाक्षी परावरेब्रह्मणिधर्मतोव्रतैःस्नातस्यमेन्यून
मलंविचक्ष्व ७ श्रीनारदउवाच भवतानुदितप्रायंयशोभगवतोऽमलं
येनैवासौनतुष्येतमन्येतद्दर्शनंखिलं ८ यथाधर्मादयश्चार्थामुनिवर्या

नुकीर्त्तिताः नतथावासुदेवस्यमहिमाह्यनुवर्णितः ९ नयद्वचश्चित्रपदंह
रेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित् तद्वायसंतीर्थमुशंतिमानसानयत्रहं
सानिरमंत्युशिक्क्षयाः १० तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोक
मबद्धवत्यपि नामान्यनंतस्ययशोंकितानियत्शृण्वंतिगायंतिगृणंतिसाध
वः ११ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं कुतः
पुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणं १२ अथोमहाभाग
भवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः उरुक्रमस्याखिलबंधमु
क्तयेसमाधिनानुस्मरतद्विचेष्टितं १३ ततोऽन्यथाकिंचनयद्विवक्षतःपृ
थग्दृशस्तत्कृतरूपनामभिः नकुत्रचित्क्वापिचदुःस्थितामतिःलभेतवाता
हतनौरिवास्पदं १४ जुगुप्सितंधर्मकृतेनुशासतःस्वभावरक्तस्यमहा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्व्यतिक्रमः यद्वाक्यतोधर्म्मइतीतरःस्थितोनमन्यतेतस्यनिवारणंजनः
१५ विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं प्रवर्त्तमा
नस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंविभोः १६ त्यक्त्वास्वधर्म्मं
चरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि यत्रक्ववाभद्रमभूदमुष्यकिं
कोवार्थआप्तोभजतांस्वधर्म्मतः १७ तस्यैवहेतोःप्रयतेतकोविदोनलभ्य
कृ तेयद्भ्रमतामुपर्य्यधः तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीर
रंहसा १८ नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं स्मरन्मु
कुंदांघ्र्युपगूहनंपुनर्व्विहातुमिच्छेन्नरसग्रहोजनः १९ इदंहिविश्वंभगवा
निवेतरोयतोजगत्स्थाननिरोधसंभवाः तद्धिस्वयंवेदभवांस्तथापितेप्रादे
शमात्रंभवतःप्रदर्शितं २० त्वमात्मनात्मानमवेह्यमोघदृक्परस्यपुंसःपर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
११

मात्मनः कलां अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगन्यतां
२१ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतो
ऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णितम् २२ अहं पुरातीतभवे
भवं मुने दास्यास्तु कस्याश्चन वेदवादिनां निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्विविक्षतां २३ ते मय्यपेताखिलचापलेऽर्भके दांते
ऽधृतक्रीडनकेऽनुवर्त्तिनि चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे
मुनयोल्पभाषिणि २४ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तद
पास्तकिल्बिषः एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजाय
ते २५ तत्रान्वहं कृष्णकथा प्रगायतामनुग्रहेणाश्रृणवं मनोहराः ताः श्र
द्धयामेनुपदं विश्रृण्वतः प्रियश्रवस्यंग ममाभवन्मतिः २६ तस्मींस्तदा ११

लब्धरुचेर्म्महामुनेप्रियश्रवस्यस्खलितामतिर्म्मम ययाहमेतत्सदस
त्स्वमायायापश्येमयिब्रह्मणिकल्पितंपरे २७ इत्थंशरत्प्रावृषिकावृतू
हरेर्व्विशृण्वतोमेनुसवंयशोमलं संकीर्त्यमानंमुनिभिर्म्महात्मभिर्भक्तिः
प्रवृत्तात्मरजस्तमोपहा २८ तस्यैवंमेनुरक्तस्यप्रश्रितस्यहतैनसः श्रद्दधा
नस्यदांतस्यानुचरस्यच २९ ज्ञानंगुह्यतमंयत्तत्साक्षाद्भगवतोदितं अन्व
वोचन्गमिष्यंतः कृपयादीनवत्सलाः ३० येनैवाहंभगवतोवासुदेवस्य
वेधसः मायानुभावमविदंयेनगच्छंतितत्पदं ३१ एतत्संसूचितंब्रह्मन्
तापत्रयचिकित्सितं यदीश्वरेभगवतिकर्म्मब्रह्मणिभावितं ३२ आमयो
येनभूतानांजायतेयश्चसुव्रतः तदेवह्यामयंद्रव्यंनपुनातिचिकित्सितं
३३ एवंनृणांक्रियायोगाः सर्व्वेसंसृतिहेतवः तएवात्मविनाशायकल्पं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेकल्पिताःपरेः ३४ यदत्रक्रियतेकर्म्मभगवत्परितोषणं ज्ञानंयत्तदधीतं
हिभक्तियोगसमन्वितं ३५ कुर्वाणायत्रकर्म्माणिभगवच्छिक्षयासकृत गृणं
तिगुणनामानिकृष्णस्यानुस्मरंतिच ३६ ॐनमोभगवतेतुभ्यंवासुदेवायधी
महि प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिमूर्त्त्यभिधानेनमंत्र
मूर्त्तिममूर्त्तिकं यजेतेयज्ञपुरुषंससम्यग्दर्शनःपुमान ३८ इमंस्वनिग
मंब्रह्मन्नवेत्यमदनुष्ठितं अदान्मेज्ञानमैश्वर्य्यंस्वस्मिन्भावंचकेशवः ३९
त्वमप्यदभ्रश्रुतविश्रुतंविभोः समाप्यतेयेनविदांबुभुत्सितंप्राख्याहिदुः
खैर्मुहुरर्दितात्मनांसंक्लेशनिर्वाणमुशंतिनान्यथा ४० इतिश्रीभागवते
महापुराणेप्रथमस्कंधेपंचमोऽध्यायः ॥५॥ सूतउवाच ॥ एवंनिशम्यभगवा
न्देवर्षेर्जन्मकर्म्मच भूयःपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः १

सूतउवाचः

10

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव वर्त्तमानोवयस्याद्येततः किमकरो
द्भवान् २ स्वायंभुवकयावृत्त्यावर्त्तितंतेपरंवयः कथंचेदमुदस्राक्षी
कालेप्राप्तेकलेवरं ३ प्राक्कल्पविषयामेतांस्मृतिंतेसुरसत्तम नह्येषव्यव
धात्कालः एषसर्वनिराकृतिः ४ ॥नारदउवाच॥ भिक्षुभिर्विप्रवसितेविज्ञा
नादेष्टृभिर्मम वर्त्तमानोवयस्याद्येततएतदकारषं ५ एकात्मजामेजन
नीयोषिन्मूढाचकिंकरी मय्यात्मजेऽनन्यगतौचक्रेस्नेहानुबंधनं ६
सास्वतंत्रानकल्पासीत्योगक्षेमंममेच्छती ईशस्यहिवशेलोकोयोषादा
रुमयीयथा ७ अहंचतद्ब्रह्मकुलेऊषिवांस्तदवेक्षया दिग्देशकालाव्युत्प
न्नोबालकःपंचहायनः ८ एकदानिर्गतांगेहात्दुहंतींनिशिगांपथि स
र्पोऽदशत्पदास्पृष्टःकृपणांकालनोदितः ९ तदातदहमीशस्यभक्तानांशम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भीप्सतः अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां १० स्फीतान् जनपदांस्तत्र पुर
ग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च ११ चित्रधातुवि
चित्राद्रीनिभभग्नभुजद्रुमान् जलाशयान् शिवजलान् नलिनीः सुरसे
विता १२ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः नलवेणुशरस्तंवकुश
कीचकगह्वरं एक एवातियातोहमद्राक्षं विपिनं महत् १३ घोरं प्रतिभया
कारं व्यालोलूकशिवाजिरं परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः १५
स्नात्वापीत्वाह्रदे नद्याउपस्पृष्टो गतश्रमः तस्मिन्निर्मनुजेऽरण्ये पिप्पलो
पस्थ आश्रितः १६ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं ध्यायत
श्चरणांभोजं भावनिर्जितचेतसा १७ औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे
शनैर्हरिः प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः १८ आनंदसंप्लवेली

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नोनाऽपश्यमुभयंमुने रूपंभगवतोयत्तत्मनःकांतंशुचापहं १९ अप
श्यत्सहसोतस्थेवैक्लव्यातदुर्म्मनाइव दिदृक्षुस्तदहंभूयःप्रणिधायम
नोहृदि २० वीक्ष्यमाणोपिनापश्यमवितृप्तइवातुरः एवंयतंतंविजने
मामाहागोचरोगिरां २१ गंभीरश्लक्ष्णयावाचाशुचःप्रशमयन्निव हंता
स्मिन्जन्मनिभवान्नमांद्रष्टुमिहार्हति अविपक्वकषायानांदुर्दर्शोहं
कुयोगिनां २२ सकृद्यद्दर्शितंरूपमेतत्कामायतेऽनघ मत्कामःशनकैःसा
धुःसर्व्वान्मुंचतिहृच्छयान् २३ सत्सेवयादीर्घयातेपियातामयिदृढाम
ति हित्वाऽवद्यमिमंलोकंगंतामज्जनतामसि २४ मतिर्म्मयिनिबद्धेयंनवि
पद्येतकर्हिचित् प्रजासर्गनिरोधेपिस्मृतिश्चमदनुग्रहात् २५ एतावदु
क्त्वोपररामतन्महद्भूतंनभोलिंगममूर्त्तिमीश्वरं अहंचतस्मैमहतांमहा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र०
२४

६ शिशयिषोरनुप्राणं विविशेंतरहं विभोः ॥३०॥ सहस्रयुगपर्य्यंत उत्थायेदं सिसृक्षत ॥६
यस्मै शीर्ष्णाऽवनामं विदधेनुकंपित्तः २६ नामान्यनंतस्यहतत्रपः पठन्गु
ह्यानिभद्राणिकृतानिचस्मरन् गांपर्य्यटंस्तुष्टमनागतस्पृहः कालंप्रती
क्षन्विमदोविमत्सरः २७ एवंकृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः का
लः प्रादुरभूत्कालेतडित्सौदामिनीयथा २८ प्रयुज्यमानेममयितांशुद्धांभा
गवतींतनुं आरब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः २९ कल्पांतइद
मादायशयानेंभस्युदन्वतः मरीचिमिश्राऋषयः प्राणेभ्योहंचजज्ञिरे
३१ अंतर्बहिःस्वलोकांस्त्रीनपर्य्येम्यऽस्कंदितव्रतः अनुग्रहान्महाविष्णोरवि
घातगतिःक्वचित् ३३ देवदत्तामिमांवीणांस्वरब्रह्मविभूषितां मूर्छयि
त्वाहरिकथांगायमानश्चराम्यहं ३४ प्रगायतःस्ववीर्य्याणितीर्थपादः कृष्ण
प्रियःश्रवाः आहूतइवमेशीघ्रंदर्शनंयातिचेतसि ३५ एतद्ध्यातुरचि २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्तानांमात्रास्पर्शेछयामुहुः भवसिंधुप्लवोदृष्टोहरिचर्य्यानुवर्नंनं ३५ यमा
दिभिर्य्योगपथैःकामलोभहतोमुहुः मुकुंदसेवयायद्वत्तथात्माद्धानशाम्य
ति ३७ सर्व्वंतदिदमाख्यातंयत्पृष्टोहंत्वयानघ जन्मकर्म्मरहस्यंमेभवतश्चा
त्मतोषणं ३८ सूतउवाच॥ एवंसंभाष्यभगवान्नारदोवासवीसुतं आमंत्र्य
वीणांरणयन्ययौयादृछिकोमुनिः ३९ अहोदेवर्षिर्धन्योयंयत्कीर्त्तिंशार्ङ्गध
न्वनः गायन्माद्यन्निदंतंत्र्यारमयत्यातुरंजगत् ४० इतिश्रीभागवतेमहापुरा
णेप्रथमस्कंधेषष्ठोध्यायः॥६॥ शौनकउवाच॥ निर्गतेनारदेसूतभगवान्वा
दरायणः श्रुतवांस्तदभिप्रेतंततःकिमकरोद्विभुः १ सूतउवाच॥ ब्रह्मनद्यां
सरस्वत्यामाश्रमःपश्चिमेतटे सम्याप्राशइतिप्रोक्तऋषीणांसत्रवर्द्धनः २ त
स्मिन्स्वआश्रमेव्यासोवदरीखंडमंडिते आसीनोपउपस्पृश्यप्रणिदध्यौमनःस्वयं ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्तियोगेनमनसिसम्यक्प्रणिहितेमले अपश्यत्पुरुषंपूर्णंमायांचतदपा
श्रयां ४ ययासंमोहितोजीवः आत्मानंत्रिगुणात्मकं परोपिमनुतेऽनर्थंत
त्कृतंचाभिपद्यते ५ अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे लोकस्याजा
नतोविद्वांश्चक्रेसात्वतसंहितां ६ यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे
भक्तिरुत्पद्यतेपुंसःशोकमोहभयापहा ७ ससंहितांभागवतींकृत्वानुक्रम्य
चात्मजं शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ८ शौनकउवाच सवै
निवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः कस्यवाबृहतीमेतामात्मारामःसमभ्य
सत् ९ सूतउवाच आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहैतुकीं
भक्तिमित्थंभूतगुणोहरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्य
गान्महदाख्यानंनित्यंविष्णुजनप्रियः ११ परीक्षितोऽथराजर्षेर्जन्मकर्मविला

16

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यनं संस्थांचपांडुपुत्राणांचस्यैकृष्णकथोदयं १२ यदामृधेकौरवसृंजयानां
वीरेष्वथोवीरगतिंगतेषु वृकोदराविद्धगदाभिमर्शभग्नोरुदंडेधृतराष्ट्रपुत्रे
१३ भर्त्तुःप्रियंद्रौणिरितिस्मपश्यन् कृष्णासुतानांस्वपतांशिरांसि उपाहरद्विप्रिय
मेवतस्यतज्जुगुप्सितंकर्म्मविगर्हयंति १४ माताशिशूनांनिधनंसुतानांनिशम्य
घोरंपरितप्यमाना तदारुदद्बाष्पकलाकुलाक्षीतांसांत्वयन्प्राहकिरीटमाली
१५ तदाशुचस्तेप्रमृजामिभद्रेयद्ब्रह्मबंधोःशिरआततायिनः गांडीवमुक्तैर्वि
शिखैरुपाहरेत्वाक्रम्ययत्स्नास्यसिदग्धपुत्रा १६ इतिप्रियांवल्गुविचित्रजल्पै
:सशांतयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशितउग्रधन्वाकपिध्वजोगुरुपुत्रं
रथेन १९ तमापतंतंसविलक्ष्यदूरात्कुमारहोद्विग्नमनारथेन पराद्रवत्प्राण
परीप्सुरुर्व्यांवद्गमंरुद्रभयाद्यथाकदिवार्कः २० यदाशरणमात्मानमैक्षत
पा

भा०प्र
२६

श्रांतवाहनं अस्त्रं ब्रह्मशिरोमेने आत्मत्राणं द्विजात्मजः २१ अथोपस्पृश्य
सलिलं संदधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते २२ ततः
प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह २३
अर्जुन उवाच कृष्ण कृष्ण महाबाहो भक्तानामभयंकर त्वमेको दह्यमानानाम
पवर्गोसि संसृतेः २४ त्वमाद्यः पुरुषः साक्षात ईश्वरः प्रकृतेः परः मायांव्
युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २५ स एव जीवलोकस्य मायामो
हितचेतसः विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम २६ तथायं चाव
तारस्ते भुवो भारजिहीर्षया स्वानां चानन्यभावानां अनुध्यानाय वासकृत २७
किमिदं स्वित्कुतो वेति देवदेव नवेद्म्यहं सर्वतो मुखमायाति तेजः परमदा
रुणं २८ श्रीभगवानुवाच वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वे

कृष्ण
२६

१७

द संहारं प्राणबाध उपस्थिते २९ नह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्शनं
जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ३० सूत उवाच श्रुत्वा भगवता प्रो
क्तं फाल्गुनः परवीरहा स्पृष्ट्वाऽपस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्राय संदधे ३१ संह
त्यान्योन्यमुभयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च ववृधातेऽर्कवह्नि
वत् ३२ दृष्ट्वास्त्रतेजस्तु तयोस्त्रीन्लोकान्प्रदहन्महत् दह्यमानाः प्रजाः
सर्वाः सांवर्त्तकममंसत ३३ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं मतं च
वासुदेवस्य संजहारार्जुनो द्वयं ३४ तत आसाद्य तरसा दारुणं गौतमीसु
तं बबंधामर्षताम्राक्षः पशुं रसनया यथा ३५ शिबिराय निनीषंतं रज्वा
बध्वा रिपुं बलात् प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ३६ मैनं पार्थार्ह
सि त्रातुं ब्रह्मबंधुमिमं जहि योसावनागसः सुप्तानवधीन्निशि बालकान्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३७ मत्तंप्रमत्तमुन्मत्तंसुप्तंबालंस्त्रियंजडं प्रपन्नंविरथंभीतंनरिपुंहंतिधर्म्म
वित् ३८ स्वप्राणान्यःपरप्राणैःप्रपुष्णात्यघृणःखलः तद्वधस्तस्यहिश्रेयो
यद्दोषात्यात्यधःपुमान् ३९ प्रतिश्रुतंचभवतापांचाल्यैश्रृण्वतोमम आह
रिष्येशिरस्तस्ययस्तेमानिनिपुत्रहा ४० तदसौवध्यतांपापआततायात्म
बंधुहा भर्तुश्चविप्रियंवीरकृतवान्कुलपांसनः ४१ एवंप
रीक्षताधर्म्मपार्थःकृष्णेनचोदितः नैछद्धंतुगुरुसुतंयद्यप्यात्महनंमहान्
४२ अथोपेत्यस्वशिबिरंगोविंदप्रियसारथिः न्यवेदयत्तंप्रियायैशोचंत्यै
आत्मजान्हतान् ४३ तथाहृतंपशुवत्पाशबद्धमवाङ्मुखंकर्म्मजुगुप्सितेन नि
रीक्ष्यकृष्णापकृतंगुरोःसुतंवामस्वभावाकृपयाननामच ४४ उवाचचासहन्स
त्यस्यबंधनानयनंसती मुच्यतांमुच्यतामेषब्राह्मणोनितरांगुरुः ४५ सरहस्यो

धनुर्वेदः सविसर्गोपसंयमः अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ४६
स एष भगवान्द्रोणः प्रजारूपेण वर्त्तते तस्यात्मनोर्द्धं पत्न्यास्ते नान्वगाद्वीरसू
ः कृपी ४७ तद्धर्म्मज्ञ महाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति प्राप्तुं पू
ज्यं वंद्यमभीक्ष्णशः ४८ मा रोदीदस्य जननी गौतमी पतिदेवता यथाहं मृ
तवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ४९ यैः कोपितं ब्रह्मकुलं राजन्यैरजिता
त्मभिः तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ५० सूत उवाच धर्म्यं न्या
य्यं सकरुणं निर्व्यलीकं समं महत् राजा धर्म्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजा
ः ५१ नकुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये
याश्च योषितः ५२ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः न भर्तु
र्नात्मनश्चार्थे योऽहन्सुप्तान् शिशून्वृथा ५३ निशम्य भीमगदितं द्रोपद्याश्च
हर १

चतुर्भुजः आलोक्य वदनं सख्युरिदमाह हसन्निव ५४ श्रीभगवानुवाच
ब्रह्मबंधुर्न्न हंतव्य आततायी वधार्हणः मयैवोभयमाम्नातं परिपाह्यनुशासनं
५५ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां प्रियं च भीमसेनस्य पांचाल्या मह्य
मेव च ५६ सूत उवाच अर्ज्जुनः सहसाज्ञाय हरेर्हार्दमथासिना मणिं ज
हार मूर्धन्यं द्विजस्य सह मूर्द्धजं ५७ विमुच्य रशनाबद्धं बालहत्याहतप्रभं
तेजसा मणिना हीनं शिबिरान्निरयापयत् ५८ वपनं द्रविणादानं स्थानान्नि
र्यापणं तथा एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः ५९ पुत्रशोकातुराः स
र्वे पांडवाः सह कृष्णया स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ६०
इति श्रीभागवते महापुराणे ... सप्तमोऽध्यायः ७ ॥ सूत उवाच ॥ अथ ते
संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः १

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

23

तेनिनीयोदकंसर्वेविलप्यचभृशंपुनः आप्लुताहरिपादाब्जरजःपूतसरिज्जले
२ तत्रासीनंकुरुपतिंधृतराष्ट्रंसहानुजं गांधारींपुत्रशोकार्त्तांपृथांकृष्णांच
माधवः ३ सांत्वयामाससमुनिभिर्हतबंधूञ्छुचार्पितान् भूतेषुकालस्यगतिं
दर्शयन्नप्रतिक्रियां ४ साधयित्वाजातशत्रोःस्वराज्यंकितवैर्हृतं घातयित्वा
सतोराज्ञःकचस्पर्शक्षतायुषः ५ याजयित्वाऽश्वमेधैस्तंत्रिभिरुत्तमकल्पकैः
तद्यशःपावनंदिक्षुशतमन्योरिवातनोत् ॥ ६ आमंत्र्यपांडुपुत्रांश्चशैनेयोद्धवसं
युतः द्वैपायनादिभिर्विप्रैःपूजितैःप्रतिपूजितः ७ गंतुंकृतमतिर्ब्रह्मन्द्वार
कांरथमास्थितः उपलेभेभिधावंतीमुत्तरांभयविह्वलां ८ पाहिपाहिमहायो
गिन्देवदेवजगत्पते नान्यंत्वदभयंपश्येयत्रमृत्युःपरस्परं ९ अभिद्रवतिमा
मीशशरस्तप्तायसोविभो कामंदहतुमांनाथमामेगर्भोनिपात्यतां १०

२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपधार्य्यवचस्तस्याभगवान्भक्तवत्सलः अपांडवमिदंकर्त्तुंद्रोणेरस्त्रमवुध्यत
११ तर्ह्येवचमुनिश्रेष्टपांडवाःपंचसायकान् आत्मानोभिमुखान्दीप्तानाल
क्ष्यास्त्राण्युपादधुः १२ व्यसनंवीक्ष्यतत्तेषामनन्यविषयात्मनं सुदर्शनेनस्वा
स्त्रेणस्वानांरक्षांव्यधाद्विभुः १३ अंतस्थःसर्व्वभूतानामात्मायोगेश्वरोहरिः
स्वयमेवावृणोद्गर्भंवैराट्याःकुरुतंतवे १४ यद्यप्यस्त्रंब्रह्मशिरस्त्वमोघंचा
प्रतिक्रियं वैष्णवंतेजआसाद्यसमशाम्यद्भृगूद्वह १५ मामंस्थाह्येतदाश्च
र्य्यंसर्व्वाश्चर्य्यमयेच्युते यइदंमाययादेव्यासृजत्यवतिहंत्यजः १६ ब्रह्म
तेजोविनिर्म्मुक्तैःरात्मजैःसहकृष्णया प्रयाणाभिमुखंकृष्णमिदमाहपृथासती
१७ कुंत्युवाच नमस्येपुरुषंत्वाद्यमीश्वरंप्रकृतेःपरं अलक्ष्यंसर्व्वभूताना
मंतर्बहिरवस्थितं १८ मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययं नलक्ष्यसे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मूढदृशांनाटोनाट्यधरोयथा १९ तथापरमहंसानांमुनीनाममलात्मनं भक्ति
योगविधानार्थंकथंपश्येमहिस्त्रियः २० कृष्णायवासुदेवायदेवकीनंदना
यच नंदगोपकुमारायगोविंदायनमोनमः २१ नमःपंकजनाभायनमः
पंकजमालिने नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २२ यथाहृषीकेशख
लेनदेवकीकंसेनरुद्धातिचिरंशुचार्पिता विमोचिताहंचसहात्मजाविभो
त्वयैवनाथेनमुहुर्विपद्गणात् २३ विषान्महाग्नेःपुरुषाददर्शनादसत्स
भायांवनवासकृच्छ्रतः मृधेमृधेनेकमहारथास्त्रतोद्रौण्यस्त्रतश्चास्महरे
भिरक्षिताः २४ विपदःसंतुताःशश्वत्तत्रतत्रजगद्गुरो भवतोदर्शनंयत्स्या
दपुनर्भवदर्शनं २५ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदःपुमान् नैवार्हत्यभि
धातुंवैत्वाकिंचनगोचरं २६ नमोकिंचनवित्तायनिवृत्तगुणवृत्तये आत्मा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायशांतायकैवल्यपतयेनमः २७ मन्येत्वांकालमीशानमनादिनिधनंविभुं
समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः २८ नवेदकश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्यनृणांविडंबनं नयस्यकश्चिद्दयितोऽस्तिकर्हिचित्द्वेष्यश्च
यस्मिन्विषमामतिर्नृणां २९ जन्मकर्मचविश्वात्मन्नजस्याकर्तुरात्मनः॥
तिर्यङ्नृषिषुयादस्सुतदत्यंतविडंबनम् ३० गोप्याददेत्वयिकृतागसिदा
मतावत्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रंनिनीयभयभावनया
स्थितस्यसामांविमोहयतिभीरपियद्बिभेति ३१ केचिदाहुरजंजातंपुण्यश्लो
कस्यकीर्तये यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३२ अपरेवसुदे
वस्यदेवक्यांयाचितोऽभ्यगात् अजस्त्वमस्यक्षेमायवधायचसुरद्विषां॥
३३ भारावतारणायान्येभुवोनावइवोदधौ सीदंत्याभूरिभारेणजातोह्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्मभुवार्थितः ३४ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्म्मभिः श्रवण
स्मरणार्हाणिकरिष्यन्नितिकेचन ३५ शृण्वंतिगायंतिगृणंत्यभीक्ष्णशः
स्मरंतिनंदंतितवेहितंजनाः तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंप
दांबुजं ३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोऽनुजीवि
नः येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां ३७ केव
यंनामरूपाभ्यांयदुभिःसहपांडवाः भवतोदर्शनंयर्हिहृषीकाणामिवे
शितु ३८ नेयंशोभिष्यतेतत्रयथेदानींगदाधर त्वत्पदैरंकिताभातिस्व
लक्षणविलक्षितैः ३९ इमेजनपदाःस्वृद्धाःसुपक्वौषधिवीरुधः वनाद्रि
नद्युदन्वतोह्येधंतेतववीक्षितैः ४० अथविश्वेशविश्वात्मन्विश्वमूर्तेस्व
केषुमे स्नेहपाशमिमंछिंधिदृढंपांडुषुवृष्णिषु ४१ त्वयिमेऽनन्यविषया

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मतिमधुपतेस्सकृत रतिमुद्वहताद्धागंगेवौघमुदन्वति ४२ श्रीकृस्नकृस्न
सखवृस्न्यृषभावनिध्रुकराजन्यवंशदहनाऽनपवर्गवीर्य गोविंदगोद्वि
जसुरार्तिहरावतार योगेश्वराखिलगुरोर्भगवन्नमस्ते ४३
पृथयेत्थंकलपदैःपरिनूताखिलोदयः मंदंजहासवैकुंठोमोहयन्नि
वमायया ४४ तांवाढमित्युपामंत्र्यप्रविश्यगजसाह्वयं स्त्रियश्चस्वपुरंया
स्यन्प्रेम्नाराज्ञानीवारितः ४५ व्यासाद्यैरीश्वरेहाज्ञैः कृस्नेनाद्भुतकर्मणा
प्रवोधितोपतिहासैर्नाबुध्यतशुचार्पितः ४६ आहराजाधर्म्मसुतश्चिंतय
न्सुहृदांवधं प्राकृतेनात्मनाविप्राःस्नेहमोहवशंगतः ४७ अहोमेपश्य
ताज्ञानंहृदिरूढंदुरात्मनः पारक्यस्यैवदेहस्यवह्वोमेक्षौहिणीर्हताः ४८
वालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः नमेस्यान्निरयान्मोक्षोह्यपिवर्षा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युतायुतैः ४९ नैनोराज्ञाः प्रजाभर्त्तुर्द्दर्म्मयुध्येवधोद्विषां इतिमेनतुबोधा
यकल्पतेशासनंवचः ५० स्त्रीणांमद्धतबंधूनांद्रोहोयोसाविहोत्थितः कर्म्म
भिर्गृहमेधीयैर्न्नाहंकल्पोव्यपोहितुं ५१ यथापंकेनपंकांभः सुरयावासुरा 29
कृतं भूतहत्यांतथैवैकांनयज्ञैर्मार्ष्टुमर्हति ५२ इति श्रीभागवते महापुरा
णे प्रथमस्कंधे ऽष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ इतिभीतः प्रजाद्रोहा
त्सर्वधर्म्मविवित्सया ततोविनशनंप्रागात् यत्रदेवव्रतोपतत्‌ः १ तदातेभ्रात
रः सर्वेसदश्वैः स्वर्नभूषितैः अन्वगछन्रथैर्विप्राः व्यासधौम्यादयस्तथा २
भगवानपिविप्रर्षेरथेनसधनंजयः सतैर्व्यरोचतनृपः कुवेरइवगुह्यकैः
३ दृष्ट्वानिपतितंभूमौदिवश्च्युतमिवोडुपं प्रणेमुः पांडवाभीष्मंसानुगाः सह
चक्रिणा ४ तत्रब्रह्मर्षयः सर्वेदेवर्षयश्चसत्तम राजर्षयश्चतत्रासनद्रष्टुंभ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रतसत्तमः ५ पर्वतोनारदोधौम्योभगवान्बादरायणः बृहदश्वोभरद्वाजःसशि
ष्योरेणुकासुतः ६ वसिष्ठइंद्रप्रमदस्त्रितोगृत्समदोऽसितः कक्षीवान्गौत
मोऽत्रिश्चकौशिकोऽथसुदर्शनः ७ अन्येतुमुनयःब्रह्मन्ब्रह्मरातादयोमलाः
शिष्यैरुपेताआजग्मुःकश्यपांगिरसादयः ८ तान्समेतान्महाभागा[illegible]नु
पलभ्यवसूत्तमः पूजयामासधर्मज्ञोदेशकालविभागवित् ९ कृ
ष्णंचतत्प्रभावज्ञआसीनंजगदीश्वरं हृदिस्थंपूजयामासमाययोपात्तवि
ग्रहं १० पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् अभ्याचष्टानुरागाश्रै
रंधीभूतेनचक्षुषा ११ अहोकष्टमहोन्याय्यंयद्यूयंधर्मनंदनाः जीवितुं
नार्हथाक्लिष्टंविप्रधर्माच्युताश्रयाः १२ संस्थितेतिरथेपांडौपृथाबाल
प्रजावधूः युष्मत्कृतेबहून्क्लेशान्प्राप्तातोकवतीमुहुः १३ सर्वंकालकृतं

30

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

31

तंमन्येभवतांचयदप्रियं सकालोयद्वसेलोकोवायोरिवघनावलिः १४ यत्रध
र्म्मसुतोराजागदापाणिर्वृकोदरः कृष्णोस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत्
नह्यस्यकर्हिचिद्राजन्पुमान्वेदविधित्सितं यद्विजिज्ञासयायुक्तामुह्यंतिक
वयोपिहि १६ तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ तस्यानुविहितोनाथानाथ
पाहिप्रजाविभो १७ एषवैभगवान्साक्षादाद्योनारायणःपुमान् मोहयन्मा
ययालोकंगूढश्चरतिवृष्णिषु १८ अस्यानुभावंभगवान्वेदगुह्यतमंशिवः
देवर्षिर्नारदःसाक्षाद्भगवान्कपिलोनृप १९ यंमन्यसेमातुलेयंप्रियंमित्रं
सुहृत्तमं अकरोस्सचिवंदूतंसौहृदादथसारथिं २० सर्वात्मनःसमदृशो
ह्यद्वयस्यानहंकृतेः तत्कृतंमतिवैषम्यंनिरवद्यस्यनक्वचित् २१ तथाप्येकां
तभक्तेषुपश्यभूपानुकंपितं यन्मेसूंस्त्यजतःसाक्षात्कृष्णोदर्शनमागतः २२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
२३ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्त्तयन् त्यजन्कलेवरं योगी मुच्यते का ३२
मकर्म्मभिः २३ स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं
प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः २४
सूत उवाच युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे अपृच्छद्विविधान्धर्मा
नृषीणामनुशृण्वतां २५ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं वैरा
ग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् २६ दानधर्म्मान्राजधर्म्मान्मो
क्षधर्म्मान्विभागशः स्त्रीधर्म्मान्भगवद्धर्मान्समासव्यासयोगतः २७ ध
र्म्मार्थकाममोक्षांश्च सहोपायान्यथा मुने नानाख्यानेतिहासेषु वर्णया
मा मास तत्त्ववित् २८ धर्म्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो योगि कृष्ण
नश्छंदमृत्योर्वांछितस्तूत्तरायणः २९ तदोपसंहृत्य गिरः सहस्र २३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णीर्विमुक्तसंगंमनः आदिपूरुषे कृष्णेलसत्पीतपटेचतुर्भुजेपुरःस्थितेम 33
मीलितदृक्व्यधारयंत ३० विशुद्धयाधारणयाहताशुभस्तदीक्षयैवाशु
गतायुधश्रमः निवृत्तसर्वेंद्रियवृत्तिविभ्रमः तुष्टावजन्यंविसृजंजना
र्दनं ३१ श्रीभीष्मउवाच इतिमतिरुपकल्पितावितृष्णाभगवतिसात्वते
पुंगवेविभूम्नि स्वसुखमुपगतेक्वचिद्विहर्तुंप्रकृतिमुपेयुषियद्भवप्रवाहः
३२ त्रिभुवनकमनंतमालवर्णंरविकरगौरवरांबरंदधाने वपुरलककु
लावृताननाब्जंविजयसखेरतिरस्तुमेऽनवद्या ३३ युधितुरगरजोविधूम्र
विष्वक्कचलुलितश्रमवार्यलंकृतास्ये ममनिशितशरैर्विभिद्यमानत्वचि
विलसत्कवचेस्तुकृष्णआत्मा ३४ सपदिसखिवचोनिशम्यमध्येनिजप
रयोर्बलयोरथंनिवेश्य स्थितवतिपरसैनिकायुरक्ष्णापहृतवतिपार्थ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
२४

सखेरतिर्ममास्तु ३५ व्यवहृतपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदो
षबुध्या कुमतिमहरदात्मविद्ययायश्चरणरतिःपरमस्यतस्यमेस्तु ३६ स्व
निगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः धृतरथचरणो
भ्ययाच्चलद्गुर्हरिरिवहंतुमिभंगतोत्तरीयः ३७ शितविशिखहतोविशीर्णदं
शःक्षतजपरिप्लुतआततायिनोमे प्रसभमभिससारमद्वधार्थंसभवतुमे
भगवान्गतिर्मुकुंदः ३८ विजयरथकुटुंबआत्ततोत्रेधृतहयरश्मिनितच्छ्रि
येक्षणीये [illegible] भगवतिरतिरस्तुमेमुमूर्षोर्यमिहनिरीक्ष्यहतागताःस्वरूपं
३९ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः कृतम
नुकृतवत्यउन्मदांधाःप्रकृतिमगन्किलयस्यगोपवध्वः ४० मुनिगणनृप
वर्यसंकुलेंतःसदसियुधिष्ठिरराजसूयएषां अर्हणमुपपेदईक्षणीयोममदृ

भीष्म
२४

रा

34

१ श्रा

दृग्गोचरएषआविरात्मा ४१ तमिममहमजंशरीरभाजांहृदिहृदिधिष्ठितमात्म
कल्पितानां प्रतिदृशमिवनैकधार्कमेकंसमधिगतोस्मिविधूतभेदमोहः ४२
सूत उवाच॥ कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावे
श्यसोंतःश्वासउपारमत् ४३ संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिष्कले सर्वे
वभूवुःतेतूष्णींवयांसीवदिनात्यये ४४ तत्रदुंदुभयोनेदुर्देवमानववादि
ताः शशंसुःसाधवोराज्ञांखात्पेतुःपुष्पवृष्टयः ४५ तस्यनिर्हरणादीनिसंप
रेतस्यभार्गव युधिष्ठिरःकारयित्वामुहूर्तंदुःखितोभवत् ४६ तुष्टुवुर्मुनयो
हृष्टाःकृष्णंतद्गुह्यनामभिः ततस्तेकृष्णहृदयाःस्वाश्रमान्प्रययुःपुनः ४७
ततोयुधिष्ठिरोगत्वासहकृष्णोगजाह्वयं पितरंसांत्वयामासगांधारींचतप
स्विनीं ४८ पित्राचानुमतोराजावासुदेवानुमोदितः चकारराज्यंधर्मेण

35

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पितृपैतामहं विभुः ४९ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे नवमोऽध्यायः ॥
॥ शौनक उवाच ॥ हत्वास्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्म्मविदां वरि
ष्ठः सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः १ ॥ सूत उ
वाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः निवेशयित्वा
निजराज्यईश्वरो युधिष्टिरं प्रीतमनाबभूवह २ निशम्य भीष्मोक्तमथाच्यु
तोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः शशास गामिंद्र इवाजिताश्रयः परिध्युपां
तामनुजानुवर्त्तितः ३ कामं ववर्ष पर्ज्जन्यः सर्वकामदुघा मही सिषिचुः स्म
व्रजान्गावः पयसोधस्वतीर्मुदा ४ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः
फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ५ नाधयो व्याधयः क्लेशा दैवभू
तात्महेतवः अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित् ६ उषित्वा हा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तिनपुरे मासान्कतिपयान्हरिः सुहृदांच विशोकाय स्वसुश्च प्रियकाम्यया ७
आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवा 37
दितः ८ सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृतराष्ट्रश्च युयुत्सु
र्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः न सेहिरे विमुह्यंतो
विरहं शार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमानं
यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं क
थं दर्शनस्पर्शसंलापशयनासनभोजनैः १२ सर्वे ते निमिषैरक्षैस्तमनुद्रुत
ते चेतसः वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह १३ न्यरुंधन्नुद्गलद्बाष्पमौ
त्कंठ्याद्देवकीसुते निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रियः १४ मृदंगशं
खभेर्यश्च वीणापणवगोमुखाः धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा १५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मि
तेक्षणाः १६ सितातपत्रं जग्राह मुक्तादामविभूषितं रत्नदंडं गुडाकेशः
प्रियः प्रियतमस्य ह १७ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्य
माणः कुसुमै रेजे मधुपतिः पथि १८ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजे
रिताः नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः १९ अन्योन्यमासी
त्संजल्प उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः २०
स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि अग्रे गुणेभ्यो
जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु २१ स एव भूयो निजवी
र्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षती अनात्मरूपात्मनि रूपनामनी
विधित्समानोनुससार शास्त्रकृत २२ स वा अयं यत्पदमत्र सूरयो जितें

38

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नृपा

ड्रियानिर्ज्जितमातरिश्वनः पश्यंति भक्त्युत्कलितामलात्मना नन्वेषसत्वं
परिमार्ष्टुमर्हति २३ सवाअयंसख्यनुगीतसत्कथोवेदेषुगुह्येषुचगुह्य
वादिभिः यएकईशोजगदात्मलीलयासृजत्यवत्यत्तिनतत्रसज्जते २४
यदाह्यधर्म्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्वतः किलः धत्तेभगं
सत्यमृतंदयांयशोभवायरूपाणिदधद्युगेयुगे २५ अहोअलंश्लाघ्यतमं
यदोःकुलंअहोअलंपुन्यतमंमधोर्वनं यदेषपुंसामृषभः श्रियःपतिःस्व
जन्मनाचंक्रमणेनचांचति २६ अहोवतस्वर्यशसस्तिरस्करीकुशस्थली
पुन्ययशस्करीभुवः पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंस्वपतिंस्मय
त्प्रजाः २७ नूनंव्रतस्नानहुतादिनेश्वरः समर्च्चितोह्यस्यगृहीतपाणिभिः
पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः २८ यावीर्य्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शुल्केन हृतास्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः प्रद्युम्नसांबांबसुता
दयोपरायाश्चाहृताः भौमवधे सहस्रशः २९ एताः परंस्त्रीत्वमपास्तपेशलं
निरस्तशौचं बत साधु कुर्वते यासां गृहात्पुष्करलोचनः पतिर्न्न जात्वपैत्या
हृतिभिर्हृदिस्पृशन् ३० एवंविधा गदंतीनां स गिरः पुरयोषितां निरीक्ष
णेनाभिनंदन् सस्मितेन ययौ हरिः ३१ अजातशत्रुः पृतनां गोपीथाय मधुद्वि
षः परेभ्यः शंकितः स्नेहात् प्रायुंक्त चतुरंगिणीं ३२ अथ दूरगतान् शौरिः
कौरवान् विरहातुरान् संन्यवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ३३
कुरुजांगलपांचालान् शूरसेनान् सयामुनान् ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्या
न्सारस्वतानथ ३४ मरुधन्वमतिक्रम्य सौवीराभीरयोपुमान् आनर्त्तान्
भार्ग्गवोपागात् श्रांतवाहो मनाग्विभुः ३५ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ताथसुहृत्पतिःपिता त्वंसद्गुरुर्नःपरमंचदैवंयस्यानुवृत्याकृतिनोवभू
विम ७ अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनं प्रेमस्मि
तस्निग्धनिरीक्षणाननंपश्येमरूपंतवसर्वसौभगं ८ यर्ह्यंवुजाक्षापस
सारभोभवान्कुरून्मधून्वाथसुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमःक्षणोभ
वेद्रविंविनाक्ष्णोरिवनस्तवाच्युत ९ इतिचोदीरितावाचःप्रजानांभक्तव
त्सलः शृण्वानोऽनुग्रहंदृष्ट्यावितन्वन्प्राविशत्पुरं १० मधुभोजद
शार्हार्हकुकुरांधकवृष्णिभि आत्मतुल्यवलैर्गुप्तांनागैर्भोगवतीमिव ११
सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृतपद्माकर
श्रियम् १२ गोपुरद्वारमार्गेषुकृतकौतुकतोरणां चित्रध्वजपताकाग्रैरंतः
प्रतिहतातपां १३ संमार्जितमहामार्गरथ्यापणकचत्वरां सिक्तांगंधज

41

ताडिताः सायंभेजेदिशंपश्चात्गविष्ठोगांगतस्तदा ३६ इतिश्रीभागवतेमहा
पुराणेप्रथमस्कंधेदशमोध्यायः॥१०॥सूतउवाच॥ आनर्त्तान्सउपव्रज्यस्व
र्द्धान्जनपदान्स्वकान् दध्मौदरवरंतेषां विषादंशमयन्निव १ सउच्चकाशेध
वलोदरोदरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमानःकरकंजसंपुटे
यथाब्जखंडेकलहंसउत्स्वनः २ तमुपश्रुत्यनिनदंजगद्भयभयावहं प्र
त्युद्ययुःप्रजाःसर्वाभर्तृदर्शनलालसाः ३ तत्रोपनीतबलयोरवेर्दीपमिवा
दृताः आत्मारामंपूर्णकामंनिजलाभेननित्यदा ४ प्रीत्युत्फुल्लमुखाःप्रोचु
र्हर्षगद्गदयागिरा पितरंसर्वसुहृदमपिवीतारमिवार्भकाः॥५॥नताःस्मते
नाथसदांघ्रिपंकजंविरंचिवैरंच्यसुरेंद्रसेवितं परायणंक्षेममिहेच्छतांप
रंनयत्रकालःप्रभवेत्परप्रभुः ६ भवायनस्त्वंभवविश्वभावनत्वमेवमा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५३

लैरुप्तांफलपुष्पाक्षतांकुरैः १४ द्वारिद्वारिगृहाणांचदध्यक्षतफलेक्षुभिः
अलंकृतांपूर्णकुंभैर्बलिभिर्धूपदीपकैः १५ निशम्यप्रेष्ठमायांतंवसुदे
वोमहामनाः अक्रूरश्चोग्रसेनश्चरामश्चाद्भुतविक्रमः १६ प्रद्युम्नश्चारु
देष्णश्चसांबोजांबवतीसुतः प्रहर्षवेगोच्छसितशयनासनभोजनाः १७
वारणेंद्रंपुरस्कृत्यब्राह्मणैःससुमंगलैः शंखतूर्यनिनादेनब्रह्मघोषेणचा
दृताः १८ प्रत्युज्जग्मूरथैर्हृष्टाः प्रणयागतसाध्वसाः वारमुख्याश्चशतशो
यानैस्तद्दर्शनोत्सुकाः १९ लसत्कुंडलनिर्भातकपोलवदनश्रियः नटन
र्तकगंधर्वाःसूतमागधवंदिनः गायंतिचोत्तमश्लोकचरितान्यद्भुतानिच
२० भगवांस्तत्रबंधूनांपौराणामनुवर्त्तिनां यथाविध्युपसंगम्यसर्वेषांमा
नमादधे २० प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वास्यचाश्वपा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र ५५

२९ केभ्योवरैश्चाभिमतैर्विभुः २१ स्वयंचगुरुभिर्विप्रैःसदारैःस्थाविरैरपि आ
शीर्भिर्युज्यमानोन्यैर्वंदिभिश्चाविशत्पुरं २२ राजमार्गंगतेकृष्णेद्वारकाया
कुलस्त्रियः हर्म्याण्यारुरुहुर्विप्रा तदीक्षणमहोत्सवाः २३ नित्यंनिरी
क्षमाणानांयद्यपिद्वारकौकसां नवितृप्यंतिहिदृशः श्रियोधामांगमच्युत
२४ श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशां बाहवोलोकपालानांसा
रंगाणांपदांबुजं २५ सितातपत्रव्यजनैरुपस्कृतःप्रसूनवर्षैरभिवर्षितः
पथि पिशंगवासावनमालयाबभौघनोयथार्कोडुपचापवैद्युतैः २६
प्रविष्टस्तुगृहंपित्रोःपरिष्वक्तःस्वमातृभिः ववंदेशिरसासप्तदेवकीप्रमु
खामुदा २७ ताःपुत्रमंकमारोप्यस्नेहस्नुतपयोधराः हर्षविह्वलितात्मा कृष्ण
नःसिषिचुर्नेत्रजैर्जलैः २८ पत्न्यःपतींप्रोष्यगृहानुपागतंविलोक्यसं २९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जातमनोमहोत्सवाः उत्तस्थुरारात्सहसासनाशयात्साकंव्रतैर्व्रीडितलोचनाननाः
३० तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाःपरिरेभिरेपतिं निरुद्धमप्या
स्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात् ३१ यद्यप्यसौपार्श्वगतो
रहोगतस्तथापितस्यांघ्रियुगंनवंनवं पदेपदेकाविरमेततत्पदाच्चलापियं
श्रीर्नजहातिकर्हिचित् ३२ एवंनृपाणांक्षितिभारजन्मनामक्षौहिणीभिःप
रिवृत्ततेजसां विधायवैरंश्वसनोयथानलंमिथोवधेनोपरतोनिरायुधः
३३ सएवनरलोकेस्मिन्नवतीर्णःस्वमायया रेमेस्त्रीरत्नकूटस्थोभगवा
न्प्राकृतोयथा ३४ उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहि
तोमदनोपियासां संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येंद्रियंविमथि
तुंकुहकैर्नशेकुः ३५ तमयंमन्यतेलोकोह्यसंगमपिसंगिनं आत्मौपम्ये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र ३० नमनुजंत्याद्दन्वानंयतोबुधः ३६ एतदीशनमीशस्यप्रकृतिस्थोपितद्गुणैः 46
नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया ३७ तंमेनिरेबलामूढाः स्त्रैणंचा
नुव्रतंरहः अप्रमाणविदोभर्त्तुरीश्वरंमतयोयथा ३८ इतिश्रीभागवतेम
हापुराणेप्रथमस्कंधे एकादशोध्यायः ॥११॥ शौनकउवाच ॥ अश्व
त्थाम्नोपसृष्टेनब्रह्मशीर्ष्णोरुतेजसा उत्तरायाहतोगर्भईशेनाजीवितःपुनः १
तस्यजन्ममहाबुद्धेःकर्माणिचमहात्मनः निधनंचयथैवासीत्सप्रेत्यगतवा
न्यथा २ तदिदंश्रोतुमिच्छामोगदितुंयदिमन्यसे ब्रूहिनःश्रद्दधानानांयस्य
ज्ञानमदाच्छुकः ३ ॥सूतउवाच॥ अपीपलद्धर्मराजःपितृवद्रंजयन्प्रजाः
निस्पृहःसर्वकामेभ्यःकृष्णपादानुसेवया ४ संपदःक्रतवोविप्रामहिषीभ्रा रुम ३०
तरोमही जंबूद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं ५ किंतेकामाःसुरस्पार्हा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

47

मुकुंदमनसोद्विजाः अधिजग्मुर्मुदंराज्ञःक्षुधितस्ययथेतरे ६ मातुर्गर्भगतो
वीरःसतदाभृगुनंदन ददर्शपुरुषंकंचिद्दह्यमानोस्त्रतेजसा ७ अंगुष्टमात्र
ममलंस्फुरत्पुरटमौलिनं अपीच्यदर्शनंश्यामंतडिद्वाससमच्युतं ८ श्रीमद्दी
र्घचतुर्बाहुंतप्तकांचनकुंडलं क्षतजाक्षंगदापाणिमात्मनःसर्वतोदिशं ९
परिभ्रमंतमुल्काभंभ्रामयंतंगदांमुहुः अस्त्रतेजःस्वगदयानीहारमिवगोप
तिः १० विधमंतंसंनिकर्षेपर्यैक्षतकइत्यसौ विधूयतदमेयात्माभगवान्
धर्मगुप्विभुः ११ मिषतोदशमासस्यतत्रैवांतर्दधेहरिः ततःसर्वगुणोद
र्केसानुकूलग्रहोदये जज्ञेवंशधरःपांडोर्भूयःपांडुरिवौजसा १२ तस्यप्री
तमनाराजाविप्रैर्धौम्यकृपादिभिः जातकंकारयामासवाचयित्वाचमंगलं
१३ हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृपतिर्वरान् प्रादात्स्वन्नंचविप्रेभ्यो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रजातीर्थेसतीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टाराजानंप्रश्रयानतं एतर्ह्यस्मि
न्प्रजातंतौकुरूणांपौरवर्षभ १५ दैवेनाप्रतिघातेनशुक्लेसंस्थामुपेयुषि रातो
वोनुग्रहार्थाय विष्णुनाप्रभुविष्णुना ॥१६॥ तस्मान्नाम्नाविष्णुरातइतिलोकेबृ
हच्छ्रवाः भविष्यतिनसंदेहोमहाभागवतोमहान् ॥१७॥ युधिष्ठिरउवाच ॥
अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः अनुवर्तितास्वित्यशसासा
धुवादेनसत्तमाः १९ ब्राह्मणाऊचुः ॥ पार्थप्रजाऽवितासाक्षादिक्ष्वाकुरिवमा
नवः ब्रह्मण्यःसत्यसंधश्चरामोदाशरथिर्यथा २०. एषदाताशरण्यश्चयथा
ह्यौशीनरःशिबिः यशोवितनितास्वानांदौष्यंतिरिवयज्वनां २१ धन्विनामग्र
णीरेषतुल्यश्चार्जुनयोर्द्वयोः हुताशइवदुर्द्धर्षःसमुद्रइवदुस्तरः २२ मृगेंद्र
इवविक्रांतोनिषेव्योहिमवानिव तितिक्षुर्वसुधेवासौसहिष्णुःपितराविव २३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पितामहसमः साम्ये प्रसादे गिरिशोपमः आश्रयः सर्व्वभूतानां यथा देवो रमा
श्रयः २४ सर्व्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः रंतिदेव इवोदारो यया
तिरिव धार्म्मिकः २५ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः आहर्त्ते
षोश्वमेधानां वृद्धानां पर्य्युपासकः २६ राजर्षीणां जनयिता शास्ता चोत्पथ
गामिनां निग्रहीता कलेरेष भुवो धर्म्मस्य कारणात् २७ तक्षकादात्मनो
मृत्युं द्विजपुत्रोपसर्ज्जितात् प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः २८
जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ हित्वेदं नृपगंगायां यास्यत्यद्धा
कुतोभयं २९ इति राज्ञ उपादिश्य विप्रा जातककोविदाः लब्धोपचितयः
सर्व्वे प्रतिजग्मुः स्वकान्गृहान् ३० स एष लोके विख्यातः परीक्षिदिति
यत्प्रभुः पूर्व्वं दृष्टमनुध्यायन् परीक्षेत नरेष्विह ३१ स राजपुत्रो वव
धे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
३२

धेस्माशुशुक्लइवोडुपः आपूर्य्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ३३
यक्ष्यमाणोश्वमेधेनज्ञातिद्रोहजिहासया राजालब्धधनोदध्यौनान्यत्र
करदंडयोः ३४ तदभिप्रेतमालक्ष्यभ्रातरोऽच्युतनोदिताः धनंप्रही
णमाजन्हुरुदीच्यांदिशिभूरिशः ३५ तेनसंभृतसंभारोलब्धकामोयु
धिष्टिरः वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिं ३६ इतिश्रीभाग
वतेमहापुराणेप्रथमस्कंधेद्वादशोऽध्यायः ॥१२॥ सूतउवाच ॥ विदुर
स्तीर्थयात्रायांमैत्रेयादात्मनोगतिं ज्ञात्वागाद्धास्तिनपुरंतयाचाप्तविवि
त्सितः १ यावतःकृतवान्प्रश्नान्क्षत्ताकौषारवाग्रतः जातैकभक्तिर्गो
विंदेतेभ्यश्चोपरराम ह २ तंबंधुमागतंदृष्ट्वाधर्मपुत्रसहानुजः धृत
राष्ट्रोयुयुत्सुश्चसूतःशारद्वतःपृथा ३ गांधारीद्रोपदीब्रह्मन्सुभद्रा

कृष्ण
३२

50

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चोत्तराकृपी अन्याश्चयामयःपांडोर्ज्ञातयःससुतास्त्रियः ४ प्रत्याजग्मुः 51
प्रहर्षेणप्राणंतन्वइवागतं अभिसंगम्यविधिवत्परिष्वंगाभिवादनैः ५
मुमुचुःप्रेमबाष्पौघंविरहौत्कंठ्यकातराः राजातमर्हयांचक्रेकृतासन
परिग्रहं ६ तंभुक्तवंतमासीनंविश्रांतंसुखमासने प्रश्रयाऽवनतोराजा
प्राहतेषांचशृण्वतां ७ युधिष्ठिरउवाच॥ ॥अपिस्मरथनोयुष्मत्पक्ष
छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचितायत्समातृकाः ८ क
यावृत्त्यावर्त्तितंवश्चरद्भिःक्षितिमंडलं तीर्थानिक्षेत्रमुख्यानिसेवितानी
हभूतले ९ भवद्विधाभागवतास्तीर्थभूताःस्वयंविभो तीर्थीकुर्वंतितीर्था
निस्वांतःस्थेनगदाभृता १० अपिनःसुहृदस्तातबांधवाःकृष्णदेवताः दृ
ष्टाःश्रुतावायदवःस्वपुर्यांसुखमासते ११ इत्युक्तोधर्मराजेनसर्वंतत्सम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र
३३

52

वर्णयत यथानुभूतं क्रमशो ~~कुरु विमानस्तु महात्मनः~~ ११ विना यदुकुलक्षयं
१२ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं नावेदयत्सकरुणो दुःखितान्
द्रष्टुमक्षमः १३ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य
श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४ अबिभ्रदर्यमा दंडं यथावदघकारिषु
यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः १५ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कु
लंधरं भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया १६ एवं गृहेषु सक्तानां
प्रमत्तानां तदीहया अत्यक्रामदविज्ञातः कालः परमदुस्तरः १७ विदुरस्त
दभिप्रेत्य धृतराष्ट्रमभाषत राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् १८
प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो स एष भगवान्कालः सर्वेषां नः स कुम
मागतः १९ येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि यतः सद्यो वियुज्येत किमु ३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः आत्माचजरया
ग्रस्तःपरगेहमुपाससे २१ अहोमहीयसीजंतोर्जीविताशायथाभवान् भीमाप 53
वर्जितंपिंडमादत्तेगृहपालवत् २२ अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदूषि
ताः हृतंक्षेत्रंधनंयेषांतद्दत्तैरसुभिःकियत् २३ तस्यापितवदेहोयंकृपण
स्यजिजीविषोः परैत्यनिच्छतोजीर्णोजरयावाससीइव २४ गतस्वार्थमिमंदेहंवि
रक्तोमुक्तबंधनः अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः २५ यःस्वकात्परतो
वेहजातनिर्वेदआत्मवान् हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः २६ अथो
दीचींदिशंयातुस्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशःकालःपुंसांगुणविकर्ष
णः २७ एवंराजाविदुरेणानुजेनप्रज्ञाचक्षुर्बोधितआजमीढः छित्वास्वेषु
स्नेहपाशान्द्रढिम्नोनिश्चक्रामभ्रातृसंदर्शिताध्वा २८ पतिंप्रयांतंसुबलस्यपुत्री
पतिव्रताचानुजगामसाध्वी हिमालयंन्यस्तदंडप्रहर्षंमनस्विनामिवसत्सं

प्रहारं २९ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः गृहं
प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौवलीं च ३० तत्र संजयमासीनं पप्रच्छो
द्विग्नमानसः गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ३१ अंवा चा हतपुत्रा
र्त्ता पितृव्यः क्व गतः सुहृत् अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया ३२ आशंसमानः
शमलं गंगायां दुःखितोऽपतत् पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ३३
अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सू
तो विरहकर्षितः आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ३४ विमृज्याश्रूणि
पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ३५ ॥ संजय
उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलवर्द्धन गांधार्या वा महाबाहो मुषितोऽस्मि म
हात्मभिः ३६ अथाजगाम भगवान्नारदः सहतुंवरः प्रत्युत्थायाभिवाद्याह सा
नुजोऽभ्यर्चयन्निव ३७ युधिष्ठिर उवाच ॥ ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वितः अंवावाहतपुत्रार्त्ताक्वगताचतपस्विनी ३८ कर्णधारइवापारे भगवान्पार
दर्शकः अथाबभाषेभगवान्नारदोमुनिसत्तमः ३९ श्रीनारदउवाच माकं
चनशुचोराजन्यदीश्वरवशंजगत् लोकाःसपालाःयस्येमेवहंतिवलिमी
शितुः ४० ससंयुनक्तिभूतानिसएववियुनक्तिच यथागावोनसिप्रोतास्तं
त्यांबद्धाःस्वदामभिः ४१ वाकतंत्यांनामभिर्बद्धावहंतिवलिमीशितुः यथा
क्रीडोपस्कराणांसंयोगविगमाविह ४२ इछयाक्रीडितुःस्यातांतथैवेशेछया
नृणां यन्मन्यसेध्रुवंलोकमध्रुवंवानचोभयं सर्वथाहिनशोच्यास्तेस्नेहा
दन्यत्रमोहजात् ४३ तस्माज्जह्यंगवैक्लव्यमज्ञानकृतमात्मनः कथंत्वना
थाःकृपणावर्त्तेतिवनमामिताः ४४ अहस्तानिसहस्तानामपदानिचतुष्प
दां फल्गूनितत्रमहतांजीवोजीवस्यजीवनं ४५ तदिदंभगवान्राजन्नेका
त्माआत्मनांस्वदृक् अंतरोनंतरोभातिपश्यतंमाययोरुधा ४६ सोयमद्यमहाभाग
कालकर्मगुणाधीनोदेहोऽयंपांचभौतिकः कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं ४४

भगवाननुभूतभावनः कालरूपोऽवतीर्णोस्यामभवायसुरद्विषां ४७ निष्पादितं
देवकृत्यमवशेषंप्रतीक्षते तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वरः ४८ धृत
राष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया दक्षिणेनहिमवतऋषीणामाश्रमंगतः
४९ स्रोतोभिःसप्तभिर्यावैस्वर्धुनीसप्तधाव्यधात् सप्तानांप्रीतयेनानासप्त
स्रोतःप्रचक्षते ५० स्नात्वानुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि अब्भक्ष
उपशांतात्मासआस्तेविगतैषणः ५१ जितासनोजितश्वासःप्रत्याहृतषडिंद्रि
यः हरिभावनयाध्वस्तरजःसत्वतमोमलः ५२ विज्ञानात्मनिसंयोज्यक्षेत्रज्ञे
प्रविलाप्यतं ब्रह्मण्यात्मानमाधारेघटांबरमिवांबरे ५३ ध्वस्तमायागुणोद
र्कोनिरुद्धकरणाशयः निवर्तिताखिलाहारआस्तेस्थाणुरिवाधुना ५४ त
स्यांतरायोमैवाभूःसंन्यस्ताखिलकर्मणः सवाअद्यतनाद्राजन्परतःपंचमे
ऽहनि ५५ कलेवरंहास्यतिस्वंतच्चभस्मीभविष्यति दह्यमानेग्निभिर्देहेपत्युः

56

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

:पत्नीसहोटजे ५६ बहिःस्थितापतिंसाध्वीतमग्निमनुवेक्ष्यति विदुरस्तु
तदाश्चर्यंनिशाम्यकुरुनंदन ५७ हर्षशोकयुतस्तस्माद्गंतातीर्थनिषेवकः
इत्युक्त्वाथारुहत्स्वर्गंनारदःसहतुंबुरः ५८ युधिष्ठिरोवचस्तस्यहृदिकृ
त्वाजहाच्छुचः॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेत्रयोदशोध्यायः॥१३॥
सूतउवाच॥ संप्रस्थितेद्वारकायांजिष्णौबंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्य
कृष्णस्यचविचेष्टितं १ व्यतीताःकतिचिन्मासास्तदानायात्ततोर्ज्जुनः ददर्श
घोररूपाणिनिमित्तानिकुरूद्वहः २ कालस्यचगतिंरौद्रांविपर्य्यस्तर्तुधर्म्मि
णः पापीयसींनृणांवार्त्तांक्रोधलोभानृतात्मनं ३ जिह्मप्रायंव्यवहृतंशाठ्य
मिश्रंचसौहृदं पितृमातृसुहृद्भ्रातृदंपतीनांचकल्कनं ४ निमित्तान्यत्यरि
ष्टानिकालेचानुगतेनृणां लोभाद्यधर्म्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ५ ॥

व

३६

युधिष्ठिर उवाच॥ संप्रषितो द्वारिकायां जिष्णुर्बंधुदिदृक्षया ज्ञातुं च पुण्यश्लोकस्य
कृष्णस्य च विचेष्टितं ६ गताः सप्ताधुना मासा भीमसेन तवानुजः नायाति कस्य वा
हेतोर्नाहं वेदेदमंजसा ७ अपि देवर्षिणादिष्टः स कालोयमुपस्थितः यदात्मनो
[illegible]माक्रीडं भगवानुत्सिसृक्षति ८ यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं
प्रजाः आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ९ पश्योत्पातान्नरव्याघ्र दिव्यान्भौ
मान्सदैहिकान् दारुणान्शंसतो दूराद्भयं नो बुद्धिमोहनं १० ऊर्वक्षिबाहवो मह्यं
स्फुरंत्यंग पुनः पुनः वेपथुश्चापि हृदय आराद्दास्यंति विप्रियं ११ शिवैषोद्यंतमा
दित्यमभिरौत्यनलानना मामंग सारमेयोयमभिरेभत्यभीरुवत् १२ शस्ताः कुर्वंति
मां सव्यं दक्षिणं पशवोऽपरे वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम १३ मृत्युदूतः कृष्ण
कपोतोयमुलूकः कंपयन्मनः प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः १४ ३५

धूम्रादिशःपरिधयःकंपतेभूःसहाद्रिभिः निर्घातश्चमहानासीत्साकंचस्तनयि
त्नुभिः १५ वायुर्वातिखरस्पर्शोरजसाविसृजंस्तमः असृग्वर्षंतिजलदाबीभत्स
मिवसर्वतः सूर्यंहतप्रभंपश्यग्रहमर्दंमिथोदिवि ससंकुलैर्भूतगणैर्ज्वलितेइव
रोदसी १६ नद्योनदाश्चक्षुभिताःसरांसिचमनांसिच नज्वलत्यग्निराज्येनका
लोयंकिंविधास्यति १७ नपिबंतिस्तनंवत्सानदुह्यंतिचमातरः रुदंत्यश्रुमु
खागावोनहृष्यंतिऋषभाव्रजे १८ देवतानिरुदंतीवस्विद्यंतिह्युच्चलंतिच इमे
जनपदाग्रामाःपुरोद्यानाकराश्रमाः १८ भ्रष्टश्रियोनिरानंदाःकिमघंदर्शयंति
नः मन्यएतैर्महोत्पातैर्नूनंभगवतोपदैः १९ अनन्यपुरुषश्रीभिर्हीनाभूर्ह
तसौभगा इतिचिंतयतस्तस्यदृष्टारिष्टेनचेतसा २० राज्ञःप्रत्यागमद्ब्रह्मन्यदु
पुर्याःकपिध्वजः तंपादयोर्निपतितमयथापूर्वमनातुरं २१ अधोवदनमब्बिं
दूनमुंचंतंनयनाब्जयोः विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः २२ प

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इतिस्मसुहृन्मध्येसंस्मरन्नारदेरितम् २२ युधिष्ठिरउवाच ॥ कच्चिदानर्तपु
र्यांनःस्वजनाःसुखमासते मधुभोजदशार्हार्हाःसात्वतांधकवृष्णयः २४ शूरो
मातामहःकच्चित्स्वस्त्यास्तेवाथमारिषः मातुलःसानुजःकच्चित्कुशल्यानकदुंदु
भिः २५ सप्तस्वसारस्तत्पत्न्योमातुलान्यःसहात्मजाः आसतेसस्नुषाःक्षेमंदेव
कीप्रमुखाःस्वयं २६ कच्चिद्राजाहुकोजीवत्यसत्पुत्रोस्यचानुजः हृदीकःससु
तोक्रूरोजयंतगदसारणाः २७ आसतेकुशलंकच्चिद्येचशत्रुजिदादयः कच्चि
दास्तेसुखंरामोभगवान्सात्वतांप्रभुः २८ प्रद्युम्नःसर्ववृष्णीनांसुखमास्तेमहार
थः गंभीररयोनिरुद्धोवर्द्धतेभगवानुत २९ सुषेणश्चारुदेष्णश्चसांबोजांब
वतीसुतः अन्येचकार्ष्णिप्रवराःसपुत्राऋषभादयः ३० तथैवानुचराःशौरेः
श्रुतदेवोद्धवादयः सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः ३१ अपिस्वस्त्या
सतेसर्वेरामकृष्णभुजाश्रयाः अपिस्मरंतिकुशलमस्माकंवद्धसौहृदाः ३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः कच्चित्पुरेसुधर्म्मायांसुखमास्तेसुहृद्वृतः
३३ मंगलायचलोकानांक्षेमायचभवायच आस्तेयदुकुलांभोधावाद्योनंतसखपु
मान् ३४ यद्बाहुदंडैर्गुप्तायांस्वपुर्य्यांयदवोर्च्चिताः क्रीडंतिपरमानंदंमहापौरुषि
काइव ३५ यत्पादशुश्रूषणमुख्यकर्म्मणासत्यादयोद्व्यष्टसहस्रयोषितः निर्जि
त्यसंख्येत्रिदशांस्तदाशिषोहरंतिवज्रायुधवल्लभोचिताः ३६ यद्बाहुदंडाभ्युदया
नुजीविनोयदुप्रवीराह्यकुतोभयामुहुः अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसु
धर्म्मांसुरसत्तमोचितां ३७ कच्चित्तेनामयंतातभ्रष्टतेजाविभासिमे अलब्धमानो
ऽवज्ञातः किंवाताताचिरोषितः ३८ कच्चिन्नाभिहतोभावैः शब्दादिभिरमंगलैः
नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रुतं ३९ कच्चित्त्वंब्राह्मणंबालंगांवृद्धंरोगि
णंस्त्रियं शरणोपसृतंसत्वंनात्याक्षीःशरणप्रदः ४० कच्चित्त्वंनागमोऽगम्यांगम्यां
वासत्कृतांस्त्रियं पराजितोवाथभगवान्नोत्तमैर्न्नाधमैःपथि ४१ अपिस्वित्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्यभुंक्थास्त्वंसंभोज्यान्वृद्धबालकान् जुगुप्सितंकर्मकिंचित्कृतवान्नयदक्षम
४२ कच्चित्प्रेष्ठतमेनाथहृदयेनात्मबंधुना शून्योस्मिरहितोनित्यंमन्यसेतेऽन्यथा
नरुक् ४३ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेचतुर्दशोऽध्यायः॥१४॥
सूत उवाच॥ एवंकृष्णसखःकृष्णोभ्रात्राराज्ञाविकल्पितः नानाशंकास्पदंरूपं
कृष्णविश्लेषकर्षितः १ शोकेनशुष्यद्वदनहृत्सरोजहतप्रभः विभुंतमेवानुध्या
यन्नाशक्नोत्प्रतिभाषितुं २ कृच्छ्रेणसंस्तभ्यशुचःपाणिनामृज्यनेत्रयोः परोक्षे
णसमुन्नद्धप्रणयौत्कंठ्यकातरः ३ सख्यंमैत्रींसौहृदंचसारथ्यादिषुसंस्मरन्
नृपमग्रजमित्याहबाष्पगद्गदयागिरा ४ अर्जुन उवाच॥ वंचितोहंमहारा
जहरिणाबंधुरूपिणा येनमेपहृतंतेजोदेवविस्मापनंमहत् ५ यस्यक्षणवियो
गेनलोकोह्यप्रियदर्शनः उक्थेनरहितोह्येषमृतकःप्रोच्यतेयथा ६
यत्संश्रयाद्द्रुपदगेहमुपागतानांराज्ञांस्वयंवरमुखेस्मरदुर्मदानां तेजोहृतंख

62

लुमयाभिहितश्चमत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ७ यत्संनिधावहमु
खांडवमग्नये दादिंद्रं च सामरगणं तरसा विजित्य लब्धा सभा मयकृताद्भुतशिल्पमा
या दिग्भ्योहरन्नृपतयो बलिमध्वरे ते ८ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थं आ
र्य्योनुजस्तव गजायुतसत्ववीर्य्यः तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचिता
स्तदनयन्बलिमध्वरे ते ९ पत्न्यास्तवाधिमखक्लिप्तमहाभिषेकश्लाघिष्टचारु
कवरं कितवैः सभायां स्पृष्टं विकीर्य्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियो कृतहतेश
विमुक्तकेशाः १० यो नो जुगोप वनमेत्य दुरंतकृच्छ्रात् दुर्वाससोऽरिविहिताद्युता
ग्रभुग्यः शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्तामममंस्त सलिले विनिमग्नसंघः
११. यत्तेजसाथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे
अन्येपि चाहममुनैव कलेवरेण प्राप्तो महेंद्रभवने महदासनार्द्धं १२ तत्रैव
मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः सेंद्राः श्रिता यदनुभा

63

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वितमाजमीढतेनाहमद्यमुषितः पुरुषेण भूम्ना १३ यद्बांधवः कुरुबलाब्धिमनं
तपारमेकोरथेनततरेहमतीर्य्यसत्वं प्रत्याहृतंबहुधनंचमयापरेषांतेजस्प
दंमणिमयंचहृतंसिरोभ्यः १४ योभीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्य्यरथ
मंडलमंडितासु अग्रचरोममविभोरथयूथपानामायुर्म्मनांसिचदृशासहओ
जआर्छत १५ यद्दोर्षुमाप्रणिहितंगुरुभीष्मकर्णनप्तृत्रिगर्त्तशल्यसैंधवबाह्लिका
द्यैः अस्त्राण्यमोघमहिमानिनिरूपितानिनोपस्पृशुर्न्नृहरिदासमिवासुराणि
१६ सौत्येवृतः कुमतिनात्मदईश्वरोमेयत्पादपद्ममभवायभजंतीभव्याः मां
श्रांतवाहमरयोरथिनोभुविष्टंनप्राहरन्यदनुभावनिरस्तचित्ताः १७ नर्म्माण्यु
दाररुचिरस्मितशोभनानिहेपार्थहेऽर्ज्जुनसखेकुरुनंदनेति संजल्पितानिनर
देवहृदिस्पृशानिस्मर्त्तुर्ल्लुठंतिहृदयंममभाधवस्य १८ शय्यासनाटनविकत्थ
नभोजनादिष्वैक्याद्वयस्यऋतवानितिविप्रलब्धैः सख्युः सखेवपितृवत्तनयस्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्व्वंसहेमहान्महितयाकुमतेरघंमे १९ सोऽहंनृपेंद्ररहितःपुरुषोत्तमेनसख्या
प्रियेणसुहृदाहृदयेनशून्यः अध्वन्नुरुक्रमपरिग्रहमंगरक्षन्गोपैरसद्भिर
बलेवविनिर्ज्जितोऽस्मि २० तद्वैधनुस्तइषवःसरथोहयास्तेसोहंरथीनृपत
योयतआनमंति सर्व्वंक्षणेनतदभूदसदीशरिक्तंभस्मन्हुतंकुहकराद्धमिवो
प्तमूष्यां २१ राजंस्त्वयानुपृष्टानांसुहृदांनःसुहृत्पुरे विप्रशापविमूढानां
निघ्नतांमुष्टिभिर्म्मिथः २२ वारुणींमदिरांपीत्वामदोन्मथितचेतसां अजानता
मिवान्योन्यंचतुःपंचावशेषिताः २३ प्रायेणैतद्भगवतईश्वरस्यविचेष्टितं मिथो
निघ्नंतिभूतानिभावयंतिचयन्मिथः २४ जलौकसांजलेयद्वन्महांतोदंत्य
णीयसः दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः २५ एवंबलिष्ठैर्यदुभि
र्म्महद्भिरितरान्विभुः यदून्यदुभिरन्योन्यंभूभारान्संजहारह २५ देशकालार्थ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युक्तानि हृत्तापोपशमानि च हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे २६.
एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं सौहार्देनातिगाढेन शांतासीद्विमलामतिः
२७ वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा भक्त्यानिर्म्मथिताशेषकषायधिष
णोऽर्ज्जुनः २८ गीतंभगवताज्ञानंयत्तत्संग्राममूर्द्धनि कालकर्म्मतमोरुद्धंपुन
रध्यगमद्विभुः २९ विशोकोब्रह्मसंपत्यासंछिन्नद्वैतसंशयः लीनप्रकृतिनै
र्गुण्यादलिंगत्वादसंभवः ३० निशाम्यभगवन्मार्गंसंस्थांयदुकुलस्यच स्वःप
थायमतिंचक्रे निभृतात्मायुधिष्ठिरः ३१ पृथाप्यनुश्रुत्यधनंजयोदितंनाशंयदू
नांभगवद्गतिंचतां एकांतभक्त्याभगवत्यधोक्षजे निवेशितात्मोपरराम संसृते ३२
ययाहरद्भुवोभारंतांतनुंविजहावजः कंटकंकंटकेनेवद्वयंचापीशितुःसमं ३३ कृष्ण
यथामत्स्यादिरूपाणि धत्तेजह्याद्यथानटः भूभारःक्षपितोयेनजहौतच्चकलेवरं ३४ ४०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यदामुकुंदोभगवानिमांमहींजहौस्वतन्वाश्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचे
तसामभद्रहेतुःकलिरन्ववर्त्तत ३५ युधिष्ठिरस्तत्परिसर्पणंबुधःपुरेचराष्ट्रेच
गृहेतथात्मनि विभाव्यलोभानृतजिह्महिंसनाद्यधर्मचक्रंगमनायपर्य्यधा
त् ३६ स्वराट्पौत्रंविनयिनमात्मनःसुसमंगुणैः तोयनीव्याःपतिंभूमेरभ्यषिंचत
गजाह्वये ३७ मथुरायांतथावज्रंशूरसेनपतिंततः प्राजापत्यांनिरूप्येष्टिम
ग्नीनपिबदीश्वरः ३८ विसृज्यतत्रतत्सर्वंदुकूलवलयादिकं निर्ममोनिरहंका
रःसंछिन्नाशेषबंधनः ३९ वाचंजुहावमनसितत्प्राणइतरेचतं मृत्यावपानंसो
त्सर्गंपंचत्वेह्यजोहवीत् ४० त्रित्वेहुत्वाचपंचत्वंतच्चैकत्वेजुहोन्मुनिः सर्व
मात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४१ चीरवासानिराहारोबद्धवाङ्मुक्तमूर्द्धजः
दर्शयंनात्मनोरूपंजडोन्मत्तपिशाचवत् ४२ अनवेक्षमाणोनिरगादशृण्वन्बधि
रोयथा उदीचींप्रविवेशाशांगतपूर्वांमहात्मभिः हृदिब्रह्मपरंध्यायन्नावर्त्तेतयतो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गतः ४३ सर्वेतमनुनिर्जग्मुर्भातरःकृतनिश्चयाः कलिनाधर्म्ममित्रेणदृष्ट्वाः
स्पृष्टाःप्रजाभुविः ४४ तेसाधुकृतसर्वार्थाज्ञात्वात्यंतिकमात्मनः मनसाधा
रयामासुर्वैकुंठचरणांबुजं ४५ तद्ध्यानोद्रिक्तयाभक्त्याविशुद्धधिषणापरे त
स्मिन्नारायणपदे एकांतमतयोगतिं ४६ अवापुर्दुरवापांते असद्भिर्विषयात्म
भिः विधूतकल्मषास्थानंविरजेनात्मनैवहि ४७ विदुरोपिपरित्यज्यप्रभासेदे
हमात्मनः कृष्णावेशेनतच्चित्तःपितृभिःस्वक्षयंययौ द्रौपदीचतदाज्ञायप
तीनामनुपेक्षतां वासुदेवेभगवतिह्येकांतमतिराप्तं ४८ यःश्रद्धयैतद्भगवत्
प्रियाणांपांडोःसुतानामितिसंप्रयाणं शृणोत्यलंस्वस्त्ययनंपवित्रंलब्ध्वाहरौभ
क्तिमुपैतिसिद्धिं ४९ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेपंचदशोध्यायः
१५ ॥सूतउवाच॥ ततःपरीक्षिद्द्विजवर्यशिक्षयामहींमहाभागवतःशशा
सह यथाहिसूत्यामभिजातकोविदाःसमादिशन् विप्रमहद्गुणस्तथा १

कृस
४१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सउत्तरस्यतनयामुपयेमइरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयन्सुतान् २
आजहाराश्वमेधांस्त्रीन्गंगायांभूरिदक्षिणान् शारद्वतंगुरुंकृत्वादेवायत्राक्षिगोच
राः ३ निजग्राहौजसावीरःकलिंदिग्विजयेक्वचित् नृपलिंगधरंशूद्रंघ्नंतंगोमिथु
नंपदा ४ शौनकउवाच कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः नृपदेह
चिह्नधृक्शूद्रःकोसौगांयःपदाहनत् ५ तत्कथ्यतांमहाभागयदिकृष्णकथा
श्रयं अथवास्यपदांभोजमकरंदलिहांसतां ६ किमन्यैरसदालापैरायुषोयद
सद्व्ययः क्षुद्रायुषांनृणामंगमर्त्यानामृतमिच्छतां ७ इहोपहूतोभगवान्मृत्युः
शामित्रकर्म्मणि नकश्चिन्म्रियतेतावद्यावदास्तइहांतकः ८ एतदर्थंहिभग
वानाहूतःपरमर्षिभिः अहोनृलोकेपीयेतहरिलीलामृतंवचः ९ मंदस्यमंद
प्रज्ञस्यवयोमंदायुषस्यवै निद्रयाह्रियतेनक्तंदिवाचव्यर्थकर्म्मभिः १० सूत
उवाच यदापरीक्षित्कुरुजांगलेवसन्कलिंप्रविष्टंनिजचक्रवर्त्तिते निशम्य

भ०गी
४२

वार्त्तामनतिप्रियांततःशरासनंसंजुगप्तोंडिराददे ११ स्वलंकृतंश्यामतुरंगयोजितं
रथंमृगेंद्रध्वजमास्थितःपुनः ततोरथ्याम्बुद्धिपपत्तियुक्तया स्वसेनयादि
ग्विजयायनिर्गतः १२ भद्राश्वकेतुमालंचभारतंचोत्तरान्कुरून् किंपुरुषादी
निवर्षाणिविजित्यजगृहेकलिं १४ तत्रतत्रापिशृण्वानस्वपूर्वेषांमहात्मनां प्र
गीयमानंचयशःकृष्णमाहात्म्यसूचकं १५ आत्मानंचपरित्रातमश्वत्थाम्नोस्त्रतेज
सा स्नेहंचवृष्णिपार्थानांतेषांभक्तिंचकेशवे १६ तेभ्यःपरमसंतुष्टःप्रीत्युज्जृंभि
तलोचनः महाधनानिवासांसिददौहारान्महामनाः १७ सारथ्यपारषदसेव
नसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् स्निग्धेषुपांडुषुजगत्प्रणतिंचवि
ष्णोर्भक्तिंकरोतिनृपतिश्चरणारविंदे १८ तस्यैवंवर्त्तमानस्यपूर्वेषांवृत्तिमन्वहं छाया
नातिदूरेकिलाश्चर्यंयदासीत्तन्निबोधमे १९ धर्मःपदैकेनचरन्विच्छायामुप ४२
लभ्यगां पृच्छतिस्माश्रुवदनांविवत्सामिवमातरं २०॥ ॥धर्मउवाच॥ ॥

८३ चंदयाक्षांतिस्त्यागः संतोष आर्य्यवं शमोदमस्तपः साम्यंतितिक्षोपरतिः श्रुतं २८
ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यंतजोवलंस्मृतिः स्वातंत्र्यं कौशलंकांतिर्धैर्य्यंमार्द्दवमेव
च २९ प्रागल्भ्यंप्रश्रयःशीलंसहओजोवलंभगः गांभीर्य्यंस्थैर्य्यमास्तिक्यंकीर्त्तिर्मा
नोऽनहंकृतिः ३० इमेचान्येचभगवन्नित्यायत्रमहद्गुणाः प्रार्थ्यामहत्वमिछद्भि
र्नव्ययंतिस्मकर्हिचित् ३१ तेनाहंगुणपात्रेणश्रीनिवासेनसांप्रतं शोचामिर
हितंलोकंपाप्मनाकलिनेक्षितं ३२ आत्मानंचानुशोचामिभवंतंचामरोत्तमं देवा
न्पितॄन्ऋषीन्साधून्सर्व्वान्वर्णांस्तथाश्रमान् ३३ ब्रह्मादयोवकुतिथंयदपांग
मोक्षकामास्तपःसमचरन्भगवत्प्रपन्नाः साश्रीःस्ववासमरविंदवनंविहाययत्पा
दसौभगमलंभजतेनुरक्ता ३४ तस्याहमब्जकुलिशांकुशकेतुकेतैःश्रीमत्पदैः
भगवतःसमलंकृतांगी त्रीनत्यरोचउपलभ्यततोविभूतिंलोकान्समांव्यसृजदुत्स्म

72

कच्चिद्भद्रेऽनामयमात्मनस्ते विछायासिम्लायतेषन्मुखेन आलक्षये भवतीमंतराधिं
दूरे वंधुं शोचसि कंचनांबी २१ पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्य
माणं अहो सुरादीन्हृतयज्ञभागान्प्रजाउतस्विन्मघवत्यवर्षति २२ अरक्ष्यमाणा
: स्त्रियउर्वि बालान्शोचस्यथो पुरुषादैरिवार्त्तान् वाचं देवीं ब्रह्मकुले कुकर्म्मण्यब्रह्म
ण्ये राजकुले कुलाग्र्यान् २३ किं क्षत्रवंधून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपि
तानि इतस्ततो वाऽशनपानवासस्नानव्यवायोन्मुखजीवलोकं २४ यद्वांब ते भूरि
भरावतारकृतावतारस्य हरेर्द्धरित्रि अंतर्हितस्य स्मरती विसृष्टा कर्म्माणि निर्व्वाण
विलंवितानि २५ इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्षितासि कालेन वा ते
वलिनां वलीयसा सुरार्च्चितं किं हृतमंब सौभगं २६ धरण्युवाच भवान्हि वेद
तत्सर्वं यन्मां धर्म्मानुपृच्छसि चतुर्भिर्व्वर्त्तसे येन पादैर्ल्लोकसुखावहैः २७ सत्यं शौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

73

यंतिंतदंते ३५ योवैममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः
त्वांदुस्थमूनपदमात्मनिपौरुषेणसंपादयन्यदुषुरम्यमबिभ्रदंगं ३६ कावासहे
तविरहंपुरुषोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः स्थैर्यंसमानमहर
न्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकितायाः ३७ तयोरेवंकथयतोः पृ
थिवीधर्मयोस्तदा परीक्षिन्नामराजर्षिः प्राप्तः प्राचींसरस्वतीं ३८ इतिश्री
भागवतेमहापुराणेप्रथमस्कंधेषोडशोध्यायः ॥ १६ ॥ सूतउवाच ॥ तत्रगोमिथु
नंराजाहन्यमानमनाथवत् दंडहस्तंचवृषलंददृशेनृपलांछनं १ वृषंमृणा
लधवलंमेहंतमिवबिभ्यतं वेपमानंपदैकेनसीदंतंशूद्रताडितं २ गांचध
र्मदुघांदीनांभृशंशूद्रपदाहतां विवत्सामश्रुवदनांक्षामांयवसमिछतीं ३
पप्रछरथमारूढः कार्त्तस्वरपरिछदं मेघगंभीरयावाचासमारोपितकार्मुकः ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र०
४४

74

राजोवाच कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली नरदेवोसि वेषेण नटवत्कर्म
णां द्विजः ५ यस्त्वं कृष्णे गते दूरं सह गांडीवधन्वना शोच्योस्यशोच्यान्रहसि प्रह
रन्वधमर्हसि ६ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् वृषरूपेण किं क
श्चिद्देवो नः परिखेदयन् ७ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते भूतलेनुपतंत्य
स्मिन्विना ते प्राणिनां शुचः ८ मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भयं मा रोदीरंब
भद्रं ते खलानां मयि शास्तरि ९ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्व्यसाधुभिः तस्य म
त्तस्य नश्यंति कीर्त्तिरायुर्भगो गतिः १० एष राज्ञां परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः
अत एनं वधिष्यामि भूतद्रुहमसत्तमं ११ कोवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्प
दः मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनां १२ आख्याहि वृष भद्रं वः साधूना हम
मकृतागसां आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्तिदूषणं १३ जनेनागस्यघं युंजन्स ४४

र्वतोस्यचमद्भयं अनागास्विह भूतेषु यआगस्कृन्निरंकुशः १४ आहर्त्तासि
भुजेसाह्लादमस्यस्यापिसांगदं राज्ञोहिपरमोधर्म्मः स्वधर्म्मस्यानुपालनं १५
शासतोन्यानन्यथाशास्त्रमनापद्युत्पथानिह धर्म्म उवाच एतद्वः पांडवेयानां
युक्तमार्त्ताभयंवचः येषांगुणगणैःकृष्णोदौत्यादौभगवान्कृतः १६ नवयंक्ले
शबीजानियतस्तुःपुरुषर्षभ पुंनुषंतंविजानीमोवाक्यभेदविमोहिताः १७
केचिद्विकल्पवसना आहुरात्मानमात्मनः दैवमन्येपरेकर्म्मस्वभावमपरे
प्रभुं १८ अप्रतर्क्यादनिर्देश्यादितिकेष्वपिनिश्चयः ॥ अत्रानुरूपंराजर्षेवि
मृशस्वमनीषया १९ सूत उवाच ॥ एवंधर्म्मेप्रवदतिससंम्राड्द्विजसत्तम
समाहितेनमनसाविखेदःपर्य्यचष्टतं २० राजोवाच ॥ धर्म्मंब्रवीषिधर्म्म
ज्ञधर्म्मोसिवृषरूपधृक् यदधर्म्मकृतःस्थानंसूचकस्यापितद्भवेत् २१

अथवा देवमायाया नूनं गतिरगोचरा चेतसो वचसश्चापि भूतानामिति निश्चयः
२२ तपः शौचं दया सत्यमिति पादाः प्रकीर्त्तिताः अधर्म्मांशैस्त्रयो भग्नाः स्मय
संगमदैस्तव २३ इदानीं धर्म्म पादस्ते सत्यं निवर्त्तयेद्यतः तं जिघृक्षत्यधर्म्मो
यमनृतेनैधितः कलिः २४ इयं च भूमिर्भगवता न्यासितोरुभरा सती श्रीमद्भि
स्तत्पदन्यासैः सर्वतः कृतकौतुका २५ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झि
ताधुना अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति २६ इति धर्म्मं महीं
चैव सांतयित्वा महारथः निशांतमाददे खड्गं कलयेऽधर्म्महेतवे २७ तं
जिघांसुमभिप्रेत्य विहाय नृपलांछनं तत्पादमूलं शिरसा समगाद्भयविह्व
लः २८ पतितं पादयोर्वीरः कृपया दीनवत्सलः शरण्यो नावधीत् श्लोक्य
आह चेदं हसन्निव २९ राजोवाच न ते गुडाकेशयशोधराणां बद्धांजेर्वै भ
ले

१ त्वां वर्त्तमानं नरदेवदेहेष्वनुप्रवृत्तोयमधर्म्मपूगः लोभोऽनृतं चौर्य्यमनार्य्यमंहो ज्येष्ठा च माया कलहश्च दंभः ३२

यमस्ति किंचित् न वर्त्तितव्यं भवता कथंच क्षेत्रे मदीये त्वमधर्म्मबंधुः ३० न
वर्त्तितव्यं तदधर्मबंधो धर्म्मेण सत्येन च वर्त्तितव्ये ब्रह्मावर्त्ते यत्र यजंति यज्ञै
र्यज्ञेश्वरं यज्ञवितानविज्ञाः ३२ यस्मिन्हरिर्भगवानिज्यमानइज्यामूर्त्तिर्यजतां
शं तनोति कामानमोघान् स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा ३३ सू
त उवाच ॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः तमुद्यतासिमाहेदं दं
डपाणिमिवोद्यतं ३४ यत्र क्व च न वत्स्यामि सार्वभौम तवाज्ञया लक्षये तत्र
तत्रापि त्वामात्तेषुशरासनं ३५ तन्मे धर्म्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि य
त्रैव नियतो वत्स्य आतिष्ठंस्तेनुशासनं ३६ सूत उवाच अभ्यर्थितस्तदा
तस्मै स्थानानि कलये ददौ द्यूतं पानं स्त्रियः सूना यत्राधर्म्मश्चतुर्विधः ३७
पुनश्च याचमानाय जातरूपमदात्प्रभुः ततोऽनृतं मदं कामं रजो वैरं च पंचमं ३८

77

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृ
त् ३९ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् विशेषतो धर्मशीलो राजा लोकप
तिर्गुरुः ४० वृषस्य नष्टांस्त्रीन्पादान् तपः शौचं दयामिति प्रतिसंदध आश्वा
स्य महीं च समवर्द्धयत् ४१ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं पिताम
हेनोपन्यस्तं राज्ञारण्यं विविक्षता ४२ आस्तेऽधुना स राजर्षिः कौरवेंद्रश्रियोल्ल
सत् गजाह्वये महाभागश्चक्रवर्त्ती बृहच्छ्रवाः ४३ इत्थंभूतानुभावोऽयमभिमन्यु
सुतो नृपः यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ४४ इति श्रीभागवते म
हापुराणे प्रथमस्कंधे सप्तदशोऽध्यायः ॥१७॥ सूत उवाच यो वै द्रौण्यस्त्रविप्लु
ष्टो न मातुरुदरे मृतः अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्म्मणः १ ब्रह्मकोपोत्थि
ताद्यस्तु तक्षकात्प्राणविप्लवात् न संमुमोहोरुभयाद्भगवत्यर्पिताशयः २ उत्स

78

ज्यसर्वतःसंगंविज्ञाताजितसंस्थितिः वैयासकेर्ज्जहौशिष्योगंगायांस्वकलेव
रं ३ नोत्तमश्लोकवार्त्तानांजुषतांतत्कथामृतं स्यात्संभ्रमोंतकालेपिस्मरतां 72
तत्पदांबुजं ४ तावत्कलिर्न्नप्रभवेत्प्रविष्टोपीहसर्वतः यावदीशोमहानुर्व्या
माभिमन्यवएकराट् ५ यस्मिन्नहनिजर्ह्येवभगवानुत्ससर्ज्जगां तदैवेहानु
वृत्तोसावधर्म्मप्रभवःकलिः ६ नानुद्वेष्टिकलिंसम्राट्सारंगइवसारभुक्
कुशलान्याशुसिध्यंतिनेतराणिकृतानियत् ७ किंनुबालेषुशूरेणकलिनाधी
रभीरुणा अप्रमत्तःप्रमत्तेषुयोवृकोन्नृषुवर्त्तते ८ उपवर्णितमेतद्वःपुण्यंपा
रीक्षितंमया वासुदेवकथोपेतमाख्यानंयदपृछत ९ यायाःकथाभगवतः
कथनीयोरुकर्म्मणः गुणकर्म्माश्रयाःपुंभिःसंसेव्यास्ताबुभूषुभिः १० ऋषय
उवाचः॥ सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः यस्त्वंशंससिकृष्णस्यमर्त्यानां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मर्त्तंतेह्निनः ११ कर्म्मण्यास्मिन्ननाश्वासेधूमधूम्रात्मनांभवान्। आपाययतिगोविंद
पादपद्मासवंमधु १२ तुलयामलवेनापिनस्वर्गंनापुनर्भवं भगवत्संगिसंगस्यम
र्त्यानांकिमुताशिषः १३ कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतपरायणस्य नांतंगु
णानामगुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः १५ तन्नोभवान्वैभगवत्प्रधानोम
हत्तमैकांतपरायणस्य। हरेरुदारंचरितंविशुद्धंशुश्रूषतांनोवितनोतुविद्वन् १६
सवैमहाभागवतोपरीक्षितयेनापवर्गाख्यमदभ्रबुद्धिः। ज्ञानेनवैयासकिशब्दि
तेनभेजेखगेंद्रध्वजपादमूलं १७ तन्नःपरंपुण्यमसंवृतार्थमाख्यानमत्यद्भुतयो
गनिष्ठं आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिधानम् १८ सूतउवा
च॥ अहोवयंजन्मभृतोद्यहास्मवृद्धानुवृत्त्यापिविलोमजाताः दौष्कुल्यमाधिंविधुनो
तिशीघ्रंमहत्तमानामभिधानयोगः १९ कुतःपुनर्गृणतोनामतस्यमहत्तमैकांतपर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यणस्य योनंतशक्तिर्भगवानंनंतोमहद्गुणत्वाद्यमनंतम् २० एतावतालंननुसूचि
तेनगुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतोविभू[illegible] पांघ्रिरेणुंजुषतेनभीप्सोः
२१ अथापियत्पादनखावसृष्टंजगद्विरिंचोपहृतार्हणांभः सेशंपुनात्यन्यतमोमुकुंदा
त्कोनामलोकेःभगवत्पदार्थः २२ यत्रानुरक्ताःसहसैवधीराव्यपोह्यदेहादिषुसंगमू
ढं व्रजंतियत्पारमहंस्यमंत्यंयस्मिन्नहिंसोपशमःस्वधर्म्मः २३ अहंहिपृष्टोर्यम
णोभवद्भिराचक्ष आत्मावगमोत्रयावत् नभःपतंत्यात्मसमंपतत्रिणस्तथासमंवि
ष्णुगतिंविपश्चितः २४ एकदाधनुरुद्यम्यविचरन्मृगयांवने मृगाननुगतःश्रांत
ःक्षुधितस्तृषितोभृशं २५ जलाशयमचक्षाणःप्रविवेशतदाश्रमे ददर्शमुनिमा
सीनंशांतंमीलितलोचनं २६ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं स्थानत्र
यात्परंप्राप्तंब्रह्मभूतमविक्रियं २७ विप्रकीर्णजटाछन्नंरौरवेणाजिनेनच। वि
शुष्यत्तालुरुदकंतथाभूतमयाचत २८ अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसूनृतः।

82

०मा:
४८ अवज्ञातमिवात्मानं मन्यमानश्चुकोपह २९ अभूतपूर्वः सहसा सुस्तुञ्जामर्द्दितात्म
नः ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्यवेवच ३० सतु ब्रह्मर्षिरंसेगतां स्रुमुरगं ह
षा विनिर्मोक्षं न्धनुः कोट्या निधायपुरमागमत् ३१ एषा किं निमृतात्पोष्टकर
णोन्मीलितेक्षणः सर्पासमाधिरा हो स्वित्किंतु स्यात्तत्रवंधुभिः ३२ तस्य पुत्रोति
तेजस्वी विहरन्बालकोर्भकैः राज्ञार्घं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ३३ अहो
अधर्मः पालानां पीनां वलिभुजामिव स्वामिन्यर्घं यद्दासानां द्वारपानां शुनामि
व ३४ ब्रह्मणैः क्षत्रवंधुर्हि द्वारपाले निरूपितः सकथं तद्गृहे द्वास्थः सभांडं भो
क्तुमर्हति ३५ कृष्णेगते भगवति शास्तर्युत्पथगामिनां तद्भिन्नसेतूनद्याहं
शास्मि पश्यतमे वलं ३६ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् कौशि
क्याप उपस्पृश्य वाग्वज्रं विससर्ज्जह ३७ इति लंघितमर्यादं तक्षकः सप्तमे कृम
हनि धक्ष्यति स्म कुलांगारं नोदितो मे ततद्रुहं ३८ ततोभ्येत्याश्रमं बालो गले ४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्व्यकलेवरं पितरं वीक्ष्य दुःखार्त्तो मुक्तकंठो रुरोद [illegible] सवाङ्गिरसो ब्रह्मन्रक्ष
त्वा सुतविलापनं उन्मील्य शनकैर्नेत्रे ददृ[illegible]क्षास्वां भा॰ तो सुतं ४० विसृज्य पुत्रं
प्रप्रच्छ वत्स कस्माद्वै रोदिषि केन वा ते पदाकृतमित्युक्तः संन्यवेदयत् ४१ निशाम्य
शापमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् अहो वताहो महदद्य ते कृतं अल्पी
यसि द्रोहह उग्रदंडो धृतः ४२ न वैनभिर्नरदेवं पराख्यं संमातुमर्हस्य विपक्कबुद्धे
यत्तेजसा दुर्विषहेण गुप्ताः विंदंति भद्राण्यकुतोभयाः प्रजाः ४३ अरक्ष्यमाणे नरदे
वनाम्नि रथांगपाणिर्वयमंग लोकः तदाहि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो विवरू
थवत्क्षणात् ४४ तदद्य नः पापमुपैति नन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात्
परस्परं घ्नंति शपंति वृंजते पशून् स्त्रियोर्थान् पुरुदस्यवो जनाः ४५ तदार्य्यधर्म्म
स्तु विलीयते नृणां सर्वाश्रमाचारयुतस्त्रयीमयः ततोर्थकामाभिनिवेशितात्मनां शु
नां कपीनामिव वर्णसंकरः ४६ धर्म्मपालो नरपतिः सतु संम्राट् बृहच्छ्रवाः सा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ह्मान्महाभागवतोराजर्षिर्हयमेधयाट् ४७ क्षुत्तृट्श्रमयुतोदीनोनैवास्मच्छाप
मर्हति अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना पापंकृतंतद्भगवान्सर्वात्माक्षं
तुमर्हति ४८ तिरस्कृताविप्रलब्धाःशप्ताःक्षिप्ताहताअपि नास्यतत्प्रतिकुर्वंतितद्
भक्ताःप्रभवोपिहि ४९ इतिपुत्रकृताघेनसोनुतप्तोमहामुनिः स्वयंविप्रकृतो
राज्ञानैवाघंतदचिंतयत् ५० प्रायशःसाधवोलोकेपरैर्द्वंद्वेषुयोजिताः नव्यथं
तिनहृष्यंतियतआत्माऽगुणाश्रयः ५१ इतिप्रथमेऽष्टादशोऽध्यायः ॥१८॥ ॥
सूतउवाच ॥ ॥महीपतिस्त्वथतत्कर्मगर्ह्यंविचिंतयन्नात्मकृतंसुदुर्मनाः
अहोमयानीचमनार्यवत्कृतंनिरागसिब्रह्मणिगूढतेजसि १ ध्रुवंततोमेकृतदे
वहेलनाद्दुरत्ययंव्यसनंनातिदीर्घात् तदस्तुकाममघनिःकृतायमेयथानकु
र्यांपुनरेवमद्धा २ अद्यैवराज्यंबलमृद्धकोशंप्रकोपितोब्रह्मकुलानलोमे द
हत्वभद्रस्यपुनर्नमेभूत्पापीयसीधीर्द्विजदेवगोभ्यः ३ संचिंतयन्नित्थमथाश्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मा७

85

णोद्यथामुनेःसुतोक्तोनिर्ऋतिस्तक्षकाख्यः ससाधुमेनेनचिरेणतक्षकानलंप्रश
क्तस्यविरक्तिकारणम् ४ अथोविहायेममसुंचलोकंविमर्शितौहेयतयापुरस्तात्
कृष्णांघ्रिसेवामधिमन्यमानउपाविशत्प्रायममर्त्यनद्यां ५ यावैलसछ्रीतुलसी
विमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री पुनातिलोकानुभयत्रसेशान्कस्तांनसे
वेतमरिष्यमाणः ६ इतिव्यवछिद्यसपांडवेयःप्रायोपवेशंप्रतिविष्णुपद्यां दधौ
मुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः ७ तत्रोपजग्मुर्भुवनंपुनाना
महानुभावामुनयःसशिष्याः प्रायेणतीर्थाभिगमापदेशैःस्वयंहितीर्थानिपुनं
तिसंतः ८ अत्रिर्वशिष्ठश्च्यवनशरद्वानरिष्टनेमिर्भृगुरंगिराश्च पराशरोगाधि
सुतोथरामउतथ्यइंद्रप्रमदेध्मवाहौ ९ मेधातिथिर्देवलआर्ष्टिषेणभरद्वाजो
गौतमःपिप्पलादः मैत्रेयऔर्वःकवषःकुंभयोनिर्द्वैपायनोभगवान्नारदश्च १०
अन्येचदेवर्षिब्रह्मर्षिवर्याराजर्षिवर्याअरुणादयश्च नानार्षेयप्रवरान्समेतानाभ्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ञ्चोराजाशिरसाववंदे ११ सुखोपविष्टेष्वथतेषुभूयः कृतप्रणामः स्वचिकीर्षितं
यत् विज्ञापयामासविविक्तचेताउपस्थितोग्रेभिगृहीतपाणिः १२ परीक्षिदुवाच
अहोवयंधन्यतमानृपाणांमहत्तमानुग्रहणीयशीलाः राज्ञांकुलंब्राह्मणपादशौ
चाद्दूराद्विसृष्टंवतगर्ह्यकर्म १३ तस्यैवमेऽघस्यपरावरेशोव्यासक्तचित्तस्यगृ
हेष्वभीक्ष्णं निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते १४ तंमोपया
तंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे द्विजोपसृष्टःकुहकस्तक्षकोवादश
त्वलंगायतविष्णुगाथाः १५ पुनश्चभूयाद्भगवत्यनंतेरतिःप्रसंगश्चतदाश्रयेषु
महत्सुयांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः १६ इतिस्मराजाध्य
वसाययुक्तःप्राचीनमूलेषुकुशेषुधीरः उदङ्मुखोदक्षिणकूलआस्तेसमुद्रप
त्न्याःस्वसुतेन्यस्तभारः १७ एवंतुतस्मिन्नरदेवदेवेप्रायोपविष्टेदिविदेवसं
घाः प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुदामुहुर्दुंदुभयश्चनेदुः १८ महर्षयोवै

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुपागतायेप्रपास्यसाध्वित्यनुमोदमानाः ऊचुःप्रजानुग्रहशीलसारायदु
त्तमश्लोकगुणानुरूपं १९ ऋषयऊचुः नवाइदंराजर्षिवर्यचित्रंभवत्सु
कृष्णंसमनुव्रतेषु येऽध्यासनंराजकिरीटजुष्टंसद्योजहुर्भगवत्पार्श्वका
माः २० सर्वेवयंतावदिहास्महेऽथकलेवरंयावदसौविहाय लोकंपरंवि
रजस्कंविशोकंयास्यत्ययंभागवतप्रधानः २१ आश्रुत्यतदृषिगणवचःप
रीक्षित्समंमधुच्युद्गुरुचाव्यलीकं आभाषतैनानभिनंद्ययुक्तान्शुश्रूषमाण
श्चरितानिविष्णोः २२ राजोवाच समागताःसर्वतएवसर्वेवेदायथामूर्त्तिध
राखिविष्टे नेहाऽथवाऽमुत्रचकश्चनार्थःऋतेपरानुग्रहमात्मशीलं
२३ ततश्चवःपृच्छ्यमिमंविपृच्छेविश्रभ्यविप्राइतिकृत्यतायां सर्वात्मनाम्रि
यमाणैश्चकृत्यंशुद्धंचतत्रामृशताभियुक्ताः २४ तत्राभवद्भगवान्व्याससु

त्रोयदृच्छयागामटमानोऽनपेक्षः अलक्ष्यलिंगोनिजलाभतुष्टोवृतश्चबा
लैरवधूतवेषः २५ तंद्व्यष्टवर्षंसुकुमारपादकरोरुबाह्वंसकपोलगात्रं
चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननंकंबुसुजातकंठं २६ निगूढ
जत्रुंपृथुतुंगवक्षसमावर्त्तनाभिंवलिवल्गूदरंच दिगंबरंवक्त्रविकीर्ण
केशंप्रलंबबाहुंस्वमरोत्तमाभं २७ श्यामंसदापीच्यवयोंगलक्ष्म्या स्त्री
णांमनोज्ञंरुचिरस्मितेन प्रत्युत्थितास्तेमुनयःस्वासनेभ्यस्तल्लक्षणज्ञा अ
पिगूढवर्च्चसं २८ सविष्णुरातोऽतिथयआगतायतस्मैसपर्यांशिरसा
जहार ततोनिवृत्ताह्यबुधाःस्त्रियोर्भकामहासनेसोपविष्टःपूजितः २९
ससंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः व्यरोचतालंभग
वान्यथेंदुर्ग्रहर्क्षतारानिकरैःपरीतः ३० प्रशांतमासीनमकुंठमेधसंमु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०प्र ५२

मिं नृपो भागवतो ऽभ्युपेत्य प्रणम्य मूर्ध्नावहितः कृतांजलिर्नत्वागिरासूनृत
यान्वपृछत ३१ परीक्षिदुवाच अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः कृप ८१
यातिथिरूपेण भवद्भिस्तीर्थकाः कृताः ३२ येषां स्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः
किंपुनर्दर्शनस्पर्शपादशौचासनादिभिः ३३ सांनिध्यात्ते महायोगिन्पातकानि महां
त्यपि सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ३४ अपि मे भगवान्प्रीतः कृष्णः पां
डुसुतप्रियः पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ३५ अन्यथा ते ऽव्यक्तगतेर्द
र्शनं नः कथं नृणां नितरां म्रियमाणानां संसिद्धस्य वनीयसः ३६ अतः पृच्छामि संसि
द्धिं योगिनां परमं गुरुं पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ३७ यच्छ्रोतव्यमथो
जप्यं यत्कर्तव्यं नृभिः प्रभो स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं ३८ नूनं भग
वतो ब्रह्मन्गृहेषु गृहमेधिनां न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ३९ सू
त उवाच एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा प्रत्यभाषत धर्मज्ञो भगवा कृष्ण ५२
न्बादरायणिः ४० इति श्रीभागवते महापुराणे प्रथमस्कंधे शुकागमने नाम एको
नविंशो ऽध्यायः ॥१९॥ ॥ ॥ श्रीराधाकृष्णाभ्यां नमः ॥ ॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

९०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA